श्रीकृष्णावधूतपण्डितविरचितम्

# तर्कनवनीतम्

ग्रन्थसम्पादनम्

डा. श्रीनिवासः वरखेडी

डा.वीरनारायणः पाण्डुरङ्गी

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्

(नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन मानितम् आदर्शशोधसंस्थानम्)

बेङ्गळूरु

[illegible]

*श्रीकृष्णावधूतपण्डितविरचितम्*

# तर्कनवनीतम्

ग्रन्थसम्पादनम्

**डा. श्रीनिवासः वरखेडी**

**डा.वीरनारायणः पाण्डुरङ्गी**

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्

(नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन मानितम् आदर्शशोधसंस्थानम्)

बेङ्गळूरु

2006

*Purnaprajna Samshodhana Mandira Granthamala Series No. 44*

# *TARKANAVANEETHAM*
of ***Sri Krishnavadhuta Panditha***

Edited by
***Dr. Srinivasa Varakhedi***
***Dr. Veeranarayana Pandurangi***

Copies : 500

© Reserved - 2006

**Rs. 20/-**

Copies can had from :
The Director
Purnaprajna Samshodhana Mandiram
Purnaprajna Vidyapeetha
Katriguppa Main Road
Bangalore - 28

Printed at
**Annapurna Graphics**
53/4, R.S.Gardens
Tirupati - 517 507
Ph. 0877-2235006

# आशीर्वचनम्

अस्माकं प्रियशिष्याभ्यां वरखेडीत्युपाह्व-श्रीनिवासेन पाण्डुरङ्गीत्युपाह्व-वीरनारायणेन च सम्भूय श्रीकृष्णावधूतपण्डितविरचितः तर्कनवनीताख्यः प्रकरणग्रन्थः टिप्पणयोजनपूर्वकं संशोध्य सम्पाद्य च प्राकाश्यं नीयत इति, तयोः स्वाध्यायप्रवचननिरतयोः ज्ञानकार्येण सन्तुष्टा वयं तौ समनुगृह्णीमः । इतोऽप्यतिशयं सारस्वतसेवा प्रवर्ततामिति च भगवन्तमस्मदुपास्यं श्रीरामविट्ठलकृष्णं सम्प्रार्थयामहे ।

इदं च प्रकाशनं पूर्णप्रज्ञसंशोधनमन्दिरस्य ग्रन्थमालायामन्यतमं अस्माकं पूर्णप्रज्ञविद्यापीठस्य सुवर्णमहोत्सवावसरे मुद्राप्य समर्पितमिति विज्ञाय मोमुद्यते नश्चेतः। तदर्थं पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकं, अन्यांश्च सहकर्मिणः समभिनन्दामः ।

पूर्णप्रज्ञविद्यापीठम्
कल्याणनगरी
2006

इत्यनेकनारायणस्मृतयः
श्रीश्रीविश्वेशतीर्थश्रीपादाः
श्री पेजावर-अधोक्षज मठः
उडुपि

# प्रकाशकीयं निवेदनम्

निरतिशयस्य प्रमोदस्येदं स्थानं यद् अस्माकं गुरूणां स्वरूपोद्धारकाणां संवत्सरेऽस्मिन् सुवर्णमहोत्सवमाचरतः पूर्णप्रज्ञविद्यापीठस्य संस्थापकानां पोषकाणां श्रीश्रीविश्वेशतीर्थश्रीपादानां पञ्चसप्ततितमे वर्षे वज्रमहोत्सवावसरे अस्माकं संशोधनालयग्रन्थमालायां श्रीकृष्णावधूतपण्डितविरचितः तर्कनवनीताख्यः ग्रन्थः मुद्राप्य प्रकाश्यत इति । अस्माभिः श्रीकृष्णावधूतपण्डितानां नैकेऽन्ये ग्रन्थाः संशोध्य प्रकाशिताः । प्रकृतोऽयं तर्कनवनीतमाना ग्रन्थः प्रकाशनीय इति विचिन्त्य विद्यापीठस्य पूर्वच्छात्रयोः न्याय-वेदान्तादिशास्त्रेषु कृतपरिश्रमयोः विदुषोः डा. श्रीनिवास-**वरखेडी-डा.** वीरनारायण-पाण्डुरंगी महाभागयोः मातृकेयं प्रदत्ता । **ताभ्यां च मातृकासाह्येन** ग्रन्थोऽयं संशोध्य टिप्पणयोजनपूर्वकं सम्पादितः । **सविमर्शं टिप्पणं** चेदं न केवलं विद्यार्थिनाम् अपि तु विदुषामपि तोषावहम् उपकारकं **च भविष्यतीति** विश्वसिमः ।

आशीःप्रदानपूर्वकं पुस्तकप्रकाशने अनुमतिं दत्तवद्भ्यः गुरुभ्यः परमपूज्येभ्यः श्रीश्रीचरणेभ्यः सभक्तिश्रद्धं साष्टाङ्गं प्रणतयः समर्प्यन्ते । एवमेव संशोधनमन्दिरस्य अध्यक्षायाः डा. राजलक्ष्मीमहाभागायाः, राष्ट्रियसंस्कृत-संस्तानस्य अधिकारिवर्गस्य, अन्यानपि सहकर्मिणां तदीयसहयोगार्थं नितरामधमर्णा वयम् ।

विद्वज्जनविधेयः

बेङ्गलूरु — डा. आनन्दतीर्थाचार्यः नागसम्पिगे

2006 — निदेशकः

पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

स्वर्णमहोत्सवमाचरतः

वेदवेदान्तविद्यास्थानस्य

न्यायव्याकरणादिशास्त्रसदनस्य

समग्रे देशे लब्धप्रतिष्ठस्य

सहस्रशः विद्यार्थिनां विद्यानिकेतनस्य

# पूर्णप्रज्ञविद्यापीठस्य

संस्थापकानां

परमपूज्यानां स्वरूपोद्धारकाणां गुरूणां

## श्री श्री विश्वेशतीर्थश्रीपादानाम्

चरणनलिनयोः

सन्निधौ

समर्पितं कुसुमम्



# तर्कनवनीतम्

## भूमिका

**प्रमाण-प्रमेयतन्त्रे न्याय-वैशेषिके**

गोतमीयं न्यायदर्शनं प्रमाणविद्या-तर्कशास्त्र-आन्विक्षिकी-न्यायविद्यादिनामभिः प्रथितं वरीवर्ति। शास्त्रस्यास्य असाधारणं प्रतिपाद्यं प्रमाणजातम्। एवं तत्समानतन्त्रत्वेन परिगणितं वैशेषिकं दर्शनं काणादनाम्ना प्रसिद्धं प्रमेयतन्त्रमित्येव व्यवह्रियते। अस्य चासाधारणो विषयः प्रमेयजातम्। यद्यपि इमे शास्त्रे गोतम-कणादाभ्यां प्रणीते न केवलं पृथक् परम्परां भजतः; अपि तु प्रमाण-प्रमेययोः विषये ईषदिव वैमत्यमपि बिभृतः, तथापि बहुत्र साम्येन मिथः आदान-प्रदानाभ्यां संजातेन मत्यैक्येन च अधुना पटे नानातन्तूनाम् आतान-वितानरूपसंस्थानविशेषापन्नानां जातमिव एकतन्त्रत्वं प्रापतुः।

पदार्थोद्देशसूत्रे प्रमाणमेव प्रथमं सूत्रयता गोतमेन प्रमाणस्यैव स्वशास्त्रप्रधानप्रमेयत्वं समसूचि। भाष्यकारेण वात्स्यायनेनापि -

> प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम्।
> आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥ (न्या.भा.1.1.1, पृ.64)

इति स्वशास्त्रस्य सर्वशास्त्रोपकारकत्वात् प्रदीपत्वं प्रतिपादयता प्रोक्तमेव तत्त्वं तात्पर्यटीकायां वाचस्पतिमिश्रैः "यद्यपि इतरा विद्याः प्रामाणिकमेवार्थमभिनिविशन्ते; तथापि एतद्विद्याप्रतिपाद्यमेव प्रमाणमुपजीव्य स्वे स्वे व्युत्पाद्येऽर्थतत्त्वे प्रवर्तन्ते; न तु प्रमाणाद्यपि व्युत्पादयन्ति" (ता.टी.1.1.1, पृ.64) इति प्रत्यपादि। अत एव अक्षपादीयस्य न्यायदर्शनस्य प्रमाणतन्त्रमिति प्रमाणविद्येति च आख्या युज्यते।

न्यायमञ्जर्यां जयन्तभट्टैरपि "पृथक्-प्रस्थाना हीमा विद्याः। सा च वाक्यार्थविद्या; न प्रमाणविद्या" इति (न्या.मं.आ.5, पृ.2.135) मीमांसायाः प्रमाणविद्यात्वं प्रतिक्षिपद्भिः केवलम् आन्वीक्षिक्याः प्रमाणविद्यात्वं समस्थापि।

अथ काणाददर्शनस्य प्रधानप्रतिपाद्यं प्रमेयजातम् इति प्रथमसूत्रेणैव सूचितमस्ति।

कणादप्रणीतस्यास्य शास्त्रस्य प्रतिपाद्यं प्रमेयजातं प्रायशः नैयायिकैरप्यभ्युपगतम्। तदेतत् शास्त्रद्वयमपि कालक्रमेण एकीभूय तर्कशास्त्रं, नव्यन्यायशास्त्रमिति च नाम्ना प्रथितमभवत्।

तर्कशब्दः "तर्क्यन्ते = प्रतिपाद्यन्ते" इति व्युत्पत्त्या कर्मसाधनः प्रमेयेषु, "तर्क्यते प्रमीयते अर्थः अनेन" इति व्युत्पत्त्या करणसाधनश्च प्रमाणेषु वर्तते। तस्मात् प्रमाणप्रमेयप्रतिपादकयोः न्यायवैशेषिकयोः तर्कशास्त्रमिति नाम सुष्ठूपपद्यते। अत एव तर्कसङ्ग्रहस्य प्रकरणविशेषस्य रचयिता अन्नम्भट्टः द्रव्यादिप्रमेयजातं काणादप्रतिपाद्यं, न्यायप्रतिपाद्यं प्रत्यक्षादिप्रमाणचतुष्टयं च संग्रहेण प्रतिपादयन् -

"काणादन्यायमतयोः बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः॥" इति ऊचे।

## न्यायदर्शनसाहित्यम्

अथेदानीम् अनयोः दर्शनयोः साहित्यमधिकृत्य संक्षेपेण निरूप्यते। न्यायमतस्य मूलस्रोतः महर्षेः गोतमस्य न्यायसूत्राणि। तदुपरि वात्स्यायनमुनिप्रणीतं भाष्यं न्यायभाष्यमित्येव परां प्रसिद्धिं भजते। उद्द्योतकरस्य वार्त्तिकमपि अत्र महत् स्थानम् अश्नुते। षड्दर्शनाचार्यैः वाचस्पतिमिश्रैः वार्त्तिकस्योपरि तात्पर्यटीकानाम्नी टीका विरचिता। तस्याश्च पुनः उदयनाचार्यैः रचिता परिशुद्धिनाम्नी टीका समस्ति। उदयनाचार्यैरेव प्रणीतम् आत्मतत्त्वविवेकः, न्यायकुसुमाञ्जलिरित्येतद्ग्रन्थद्वयम् - अतीव आदरं प्राप्नोति। एवमन्येऽपि प्रकरणग्रन्थाः न्यायमञ्जर्यादय उपलभ्यन्ते। तदेवं प्राचीनन्यायप्रस्थानं न्यरूपि।

## काणाददर्शनसाहित्यम्

दर्शनस्यास्य मूलस्रोतः कणादोपज्ञं वैशेषिकसूत्रम्। तेषां सूत्राणां भाष्यं च पदार्थसंग्रहाभिधं प्रशस्तपादाचार्येण निर्मितम्। तत्र भाष्यस्य नैकानि व्याख्यानानि उपलभ्यन्ते। तत्र व्योमशिवाचार्यविरचिता व्योमवती, श्रीधराचार्यविरचिता न्यायकन्दली, उदयनाचार्यप्रणीता किरणावली, श्रीवत्साचार्यविरचिता लीलावती इत्येवमादीनि प्रथितानि। तथा वल्लभप्रणीतन्यायलीलावत्यादयश्च।

एवं हि प्राचीनकाणाददर्शनप्रस्थानसंक्षेपः।

**नव्यतर्कशास्त्रसरणिः**

अथ मध्ययुगे त्रयोदशशतके गङ्गेशोपाध्यायः न्यायदर्शनस्य प्रत्यक्षादिप्रमाणचतुष्टयविभागाद्यवलम्ब्य, प्रमेयप्रस्थाने च काणादमतमाश्रित्य च नवीनां न्यायसरणिम् आरेभे। तेनैव महाभागेन युक्तिजटिलः, नूतनपारिभाषिकपदघटितः अनितरसाधारणशैल्या तत्त्वचिन्तामणिनामकः ग्रन्थराजः निरमायि; यश्च नव्यन्यायनयप्रस्थानस्य वेदतुल्यं स्थानं भेजे। कालेन च बह्व्यः टीकाः तत्त्वचिन्तामणिग्रन्थे नैकविद्वद्भिः निरमायिषत। परन्तु तासु रघुनाथशिरोमणिरचिता दीधितिव्याख्या इतरातिशयेन समुल्लसति। अस्याश्च व्याख्यायाः गादाधरी जागदीशी इति च द्वे व्याख्यापरम्परे भवतः। गदाधरभट्टाचार्यः गाधाधर्याः, जगदीशतर्कालङ्कारश्च जागदीश्याः परम्परायाः प्रवर्त्तयितारौ।

**प्रकरणग्रन्थाः**

अत्रान्तरे नैकानि प्रकरणानि उभयमतमान-मेयसंग्राहकाणि बहुभिः विद्वद्भिः प्रणीतानि। तेषु च भासर्वज्ञरचितः न्यायसारः, तद्व्याख्यानं न्यायभूषणं, विश्वनाथपञ्चाननविरचिता कारिकावली, तद्व्याख्या मुक्तावली, वरदराजकृता तार्किकरक्षा, केशवमिश्ररचिता तर्कभाषा, शिवादित्यमिश्रप्रणीता सप्तपदार्थी, अन्नम्भट्टनिर्मितः तर्कसङ्ग्रह इत्येवमादयः प्रकरणग्रन्थाः प्रमुखाः वर्तन्ते। मुक्तावली, तर्कसङ्ग्रहश्च अधुनाऽपि अध्ययनपरम्परायां परमादरं प्राप्नुतः।

**तर्कशास्त्राध्ययनस्य वैशिष्ट्यं**

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इत्याभाणकं तर्कशास्त्राध्ययनस्य वैशिष्ट्यं द्योतयति। आभाणकेऽस्मिन् काणादमिति न्यायवैशेषिकोभयोपलक्षणम्। मानाधीनत्वान् मेयसिद्धेः सर्वदर्शनानां प्रदीपकल्पा भवतीयम् आन्वीक्षिकी विद्या। न्यायदर्शनव्युत्पादितान्येव प्रमाणानि प्रायशः परिगृह्य दर्शनान्तराणि स्वसिद्धान्तोपस्थापनाय प्रवर्तन्ते।

किं च, निखिलस्यापि शास्त्रस्य असाधारणः कश्चन विषयः भवति। तत्प्रतिपादनोपयोगीनि च इतराणि प्रमेयाणि शास्त्रान्तरेभ्यः उपाहियन्ते; येषां च शास्त्राणां तानि साधनभूतानि प्रमेयाणि प्रधानप्रतिपाद्यानि भवन्ति। तानि च प्रमेयाणि स्वप्रतिपादकशास्त्रस्य प्रधानविषयत्वं लभन्ते।

धातु-प्रातिपदिक-प्रकृति-प्रत्यय-समास-कारक-पद-वाक्यादयः पदार्थाः व्याकरणशास्त्रस्य असाधारणो विषयः। तथा दर्शनान्तरस्य न्यायवेदान्तादेः तत्तच्छास्त्रप्रतिपाद्यांशप्रतिपादनसाधनानि

भवन्ति। एवमेव न्यायशास्त्रस्य प्रधानाः विषयाः व्याकरणशास्त्रे अङ्गीभूय उपकुर्वन्ति। यथा वा - धर्माणां सामानाधिकरण्य-व्याप्त्यादिसम्बन्धाः, विरोधः, समानत्व-सादृश्य-वैसादृश्य-नित्यत्वानित्यत्वादयः सर्वशास्त्रोपयोगिधर्माः, प्रतियोग्यनुयोगिभाव-धर्मधर्मिभाव-निरूप्यनिरूपकभाव-प्रतिबध्यप्रतिबन्धकभाव-विशेष्यविशेषणभावादिसम्बन्धाः, भेदाभेदौ भावाभावौ च न्यायशास्त्रनिरूपिताः व्याकरणाद्यन्यशास्त्रोपयोगिनः।

एवं, काणाददर्शनोपज्ञप्रमेयाणि द्रव्यादीनि तेषां सम्बन्धः, न्यायाश्च वेदान्तवादप्रस्थानेषु अनेकधा उपयुक्ताः दृश्यन्ते। न्यायामृताद्वैतसिद्ध्योः द्वैताद्वैतपरयोः वादपरम्परायां काणादप्रमेयाणि, न्यायप्रमाणानि, नव्यन्यायभाषां, न्यायांश्च स्वीकृत्य स्व-स्वमतोपस्थानं परमतदूषणं च विधीयते। अस्ति च तत्र कारणविशेषः यत्, द्वैताद्वैतमतयोः प्रमाण-प्रमेयाङ्गीकारे महत्यां विप्रतिपत्त्यां सत्यां, वादिप्रतिवादिनोः उभयोरपि सम्मतं प्रमाणादि स्वीकृत्य कथा प्रवर्तनीया इति उभयमतापक्षपाती न्यायकणादसिद्धान्तः वादकथायै अङ्गत्वेन मतद्वयेनापि उररीकृतः। न केवलं द्वैताद्वैतवादप्रस्थाने, अपि तु अन्येष्वपि शास्त्रेषु अयं क्रम आदृत इति अहो तर्कशास्त्रस्य महिमा।

इत्थं च प्रायशः त्रयोदशशतकादुत्तरं रचिताः न केवलं द्वैताद्वैतदर्शनसम्बद्धप्रकरणग्रन्थाः, अपि तु जैन-मीमांसा-व्याकरण-साहित्यशास्त्रग्रन्था अपि न्यायशास्त्राध्ययनमन्तरा दुर्ज्ञेया भवन्तीति नात्र विमतिः।

**तर्कशास्त्रस्य अनितरसाधारणतया इतरोपयोगित्वम्**

यद्यपि शास्त्रान्तरवत् मोक्षमुद्दिश्यैव गौतम-कणादाभ्यां न्याय-वैशेषिकदर्शनयोः प्रणीतत्वेऽपि "चन्द्रनिरीक्षणायोन्मीलितं चक्षुः न हि नक्षत्राणि न पश्यत्याकाशे" इतिवत् लौकिकप्रयोजनान्यपि शास्त्रादस्मात् सिद्ध्यन्ति। प्रयोजनविशेषोद्देशेन निर्मितस्यापि प्रयोजनान्तरोपायत्वमपि लोके दृश्यते। यथा शाल्यर्थं जलाहरणाय निर्मितायाः कुल्याया उदकं मार्गे तत्र तत्र आभीराणामपि उपयोगाय कल्पते। उक्तं च महाभाष्ये "अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा - शाल्यर्थं कुल्याः प्रणीयन्ते। ताभ्यश्च पानीयं पीयते, उपस्पृश्यते, शालयश्च भाव्यन्ते" इति।

तथैव तर्कशास्त्रमिदं न्याय-वैशेषिकसंगमभूतं तुङ्गभद्रानदीवत्, सर्वशास्त्रोपकारकं सर्वांशेन भवति; यतः शास्त्रेणानेन व्युत्पादिताः पदार्थाः, इतरे चांशाः, बहुधा इतरशास्त्रप्रवृत्तौ उपयुज्यन्ते। यथाऽस्य शास्त्रस्य इतरेषु, विशिष्योपयोगः न तथाऽन्यस्य शास्त्रस्येति उद्धृत्यभुजम् उद्घोषयामः। पाणिनितन्त्रे च गुणवृद्ध्यादिसंज्ञाः, घञजपादिप्रत्ययाश्च अपूर्वतया आविष्कृता अपि तत्तन्त्रे

एव प्रयोजनाय भवन्ति नान्यत्र। न हि तथा तर्कशास्त्रे व्युत्पादितोऽर्थः अत्रैवोपयुज्यते, नेतरत्रेति वक्तुं पार्येत। अपि तु निखिलोऽपि विषयः अपूर्वो वा लोकत आहृतो वा तर्कशास्त्रेण परिष्कृतः दर्शनान्तरस्यापि अत्युपयुक्त इति अनुभवसिद्धोऽयं नानादर्शनपारदृश्वनां विदुषाम्।

**ग्रन्थकर्ता कृष्णावधूतः**

**'अवधूत'** इति नाम्नैव ज्ञायते यदयं भूशिरोमणिः ग्रन्थकृत् संसारासारतां ज्ञात्वा सकललौकिकसुखसाधनेषु भोगभाग्येषु विरक्तिं लब्ध्वा भगवत्सेवातुर आसीदिति। पण्डितवर्योऽयं श्रीराघवेन्द्रतीर्थानां भक्ताग्रेसरः तत्कृपाकटाक्षपात्रीभूतश्चाऽसीत्। क्वचित् कृष्णावधूतः स्वात्मानं 'गुरुराघवेन्द्रतीर्थप्रेमसुतः' इति निर्दिदेश -

**'लोके पित्रोर्यथा पुत्रे ततोऽपि प्रेमतोऽधिकात्।**
**मां रक्षति गुरुस्तस्मात् स पिताऽहं च तत्सुतः॥'** [1] इति।

**देश-कालादि**

क्रिस्तीये 1836 तमे वर्षे मन्मथनामसंवत्सरे माघशुद्धसप्तम्यां नारायणदेवरकेरेग्रामे वेङ्कटरमणाचार्यत्रिवेणिभायिदम्पत्योः ज्येष्ठपुत्रत्वेन कृष्णावधूतोऽजनिष्ट। ग्रामश्चायं बळ्ळारिमण्डलसम्बन्धिहोसपेटे - उपमण्डले वर्तते। इदानीमयं ग्रामः तुङ्गभद्राजलबन्धमध्येऽन्तर्गतः सन् न दृश्यते। कृष्णावधूतस्य कालविषये प्रो.के.टि. पाण्डुरङ्गिमहोदयाः 'अद्वैतनवनीतम्' इति कृष्णावधूतविरचितग्रन्थस्य आङ्ग्लभाषाप्रस्तावनायामेवमभिप्रायं प्राचीकटन् -

'The author of Advaithanavanitam, Sri Krishnavadhuta pandita is not far removed from us either in time or place. He lived in the last three quarters of the 19th century at Hospet near the famous historecal capital of Vijayanagar Empire'

कृष्णावधूतपण्डितपिता वेङ्कटरमणाचार्यो दरिद्रोऽपि विशालहृदयी। स्वात्मजं कृष्णं सकलविद्यापरिणतं कर्तुकामः सः बळ्ळारिमण्डलस्थसोण्डूरुग्रामनिवासिने भीमसेनाचार्याय दत्तकार्थमददात्। तेन मुद्दुकृष्णेति[2] कृतनामधेयः स तत्सकाशे काव्यन्यायालङ्कारव्याकरणशास्त्रेषु परिनिष्णातो भूत्वाऽगाधं पाण्डित्यं प्राप्नोत्। यदा स पञ्चदशवर्षीयस्तदैव भीमसेनाचार्योऽपि स्वर्गतोऽभूत्।

---

1. कृष्णावधूतकृतराघवेन्द्रतन्त्रम् - प्रथमपटलः - श्लोक - 12.2.
2. 'मुद्दु' इति कन्नडप्रादेशिकभाषाशब्दस्य 'प्रेमास्पदः' इत्यर्थः।

**'एकादशे वत्सरेऽस्य माता स्वर्गं गता तदा।**
**तस्य पञ्चदशे वर्षे भीमोऽपि त्रिदिवं गतः॥'** [3]

ततो मैसूरं नगरं प्राप्तो धीरधुरीणोऽयं तत्प्रदेशस्थरामचार्याणां सविधे पञ्चवर्षं यावद् वेदान्तविद्याध्ययनमकार्षीत्। तत्र परिनिष्ठितमतिः ग्रन्थप्रबन्धनिर्माणान्तं पाण्डित्यमवाप। त्रयोविंशतिवयस्येव मन्दारमरन्दचम्पूरिति अलङ्कारशास्त्रीयग्रन्थरत्नमारचयत्।

**'घटिकाशतकविः' -**

विविधसंस्कृतसाहित्यक्षेत्रकृषिकृदयं पण्डितो दक्षिणभारतसञ्चारकाले यदा केरल-भूषणायितश्रीमदनन्तशयनक्षेत्रमाजगाम तदा तत्र कस्याञ्चित् सभायां चतुर्विंशतिनिमिषकालावधौ (एकघटिकायां) शतसङ्ख्याकसंस्कृतश्लोकान् अनायासेन विरचय्य घटिकाशतकविरिति [4] प्रशस्तिमवाप्य विद्वन्मण्डलमण्डनायितोऽभवदित्यस्य कवेश्चरित्रेतिहासेन जानीमः।

विद्वत्कुलललामभूतो मुद्दुकृष्णाचार्यः स्वाभाविककविः तर्ककर्कशविचारचातुरी-धुरीणश्चाऽसीत्। एतद्गुणद्वयसमावेशात् तेन नैकविधाः कृतिततयो कृताः।

**कृतयः -**

श्रीमदानन्दतीर्थभगवत्पादप्रतिष्ठापितद्वैतसिद्धान्ते बद्धादरोऽपि अयमद्वैतविशिष्टाद्वैत-सिद्धान्तयोरद्वितीयागाधतलस्पर्शिपाण्डित्यमाप्तवान्। तत एव **'द्वैताद्वैतविशिष्टाद्वैतनिष्णातोऽहम्'** इति स्वात्मानं ख्यापयामास। अयं कविसार्वभौमो न्यायालङ्कारसाहित्यवेदान्तव्याकरणादिशास्त्रेषु त्रिंशदधिकान् ग्रन्थानारचयदिति गुरुदासकृतकृष्णावधूतचरितेन ज्ञायते। प्रो.के.टि. पाण्डुरङ्गिमहोदयाः अद्वैतनवनीतग्रन्थस्याऽङ्ग्लभाषाप्रस्तावनायां सप्तदशग्रन्थानुल्लिख्य **'पञ्चाशत् कृतयः अनेन कविपुङ्गवेन रचिताः'** इत्यभिप्रायं प्रकटीकृतवन्तः सन्ति। तत्कृतिसङ्ग्रहश्चेत्थं कर्तुं शक्यते -

1. **व्याकरणशास्त्रे** - 1. सुलभसाध्यव्याकरणम्।
2. **साहित्ये** - 2. ईहामृगी 3. पाण्डुरङ्गविलासचम्पूः 4. कृष्णावधूतनटनतन्त्रम् 5. मन्दारमरन्दचम्पूः।
3. **अलङ्कारशास्त्रे** - 6. काव्यलक्षणसङ्ग्रहः 7. सारस्वतालङ्कारसूत्राणि, भाष्यं च 8. काव्यनवनीतम्।
4. **न्यायशास्त्रे** - 9. तर्कनवनीतम् 10. पदार्थसागरः 11. तर्कसङ्ग्रहवाक्यार्थविवृतिः।

---

3. गुरुदासविरचितकृष्णावधूतचरितम्।
4. 'इति श्रीमद्घटिकाशतशतघण्टाविहिताष्टभाषासरसकविताचरणनिपुणस्य वासुदेवयोगीश्वरस्यान्ते-वास्यन्यतमस्य गुहपुरवासशर्मणः कृष्णशर्मणः कवेः कृतौ मन्दारमरन्दे चम्पूप्रबन्धे नर्तनबिन्दुः सप्तमः समाप्तिमगमत्।' मन्दारमरन्दचम्पूः पृ.74।

5. **वेदान्तशास्त्रम् - द्वैतवेदान्ते** - 12. मध्वमतसर्वस्वम् (लोकोपकार-व्याख्यासहितम्) 13. मध्वतत्वसूत्राणि 14. सूत्रार्थामृतलहरी 15. अध्यात्मनवनीतम्।

**अद्वैतवेदान्ते** - 16. अद्वैतनवनीतम्।

**विशिष्टाद्वैतवेदान्ते** - 17. विशिष्टाद्वैतनवनीतम्।

6. **इतरत्र** - 18. श्रीराघवेन्द्रतन्त्रम् 19. व्यासस्तवराजः।

अत्र प्रो.के.टि. पाण्डुरङ्गिमहोदयानामाभिप्रायोऽवश्यमुल्लेखनीयः।

'Besides the above works that are available to us in manuscripts and litho-press copies, a number of other works are mentioned in his biography some of which appear to be his major works, but unfortunately lost to us. A list of manuscripts handed over by the author's son to Adyar Library contains some more names which are not mentioned in the biography also. Thus the total number of works that go under the name of Sri Krishnavadhuta actually comes to about 50'.

तदेवं बहुश्रमेण संपादितमेनं ग्रन्थं विलोक्य सज्जनाः सन्तुष्यन्ति, अवगणयन्ति चात्रत्यान् दोषान् इति विभाव्य विरम्यते।

॥ श्रीगुरुराजो विजयते ॥

श्रीकृष्णावधूतपण्डितविरचितं

# तर्कनवनीतम्

*[1] गोपवधूटीदयितं नत्वा निर्मथ्य तर्कदधिराशिम् ।*
*तत्सारं नवनीतं समुद्धरामः सुखाय बालेभ्यः ॥ 1 ॥*

[2]पदार्थो द्विविधः । भावाभावाविति ।

[3]भावः[4] षड्विधः । द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-भेदात् ।

पृथिवीजलतेजोवायूनां परमाणवः आकाशकालदिगात्ममनांसि च नित्यद्रव्याणि[5] ।

---

1. गोपवधूटीदयितं कृष्णं नत्वा, तर्कदधिराशिं तर्कशास्त्ररूपं दधिराशिं निर्मथ्य, तत्सारं नवनीतं, सुखाय स्वस्य अन्यस्य च आनन्दरूपाय प्रयोजनाय, बालेभ्यः ग्रहणधारणपटुभ्यः अधीतकाव्यव्याकरणादिभ्यः समुद्धरामः। अत्र बालेभ्य इति सम्प्रदाने चतुर्थी ज्ञेया । सुखाय बालानामिति सुखेन बालेभ्य इति वा सुखेन बालेभ्य इति वा रचनं शोभनमिति भाति।
2. अत्र पदार्थ इति पदेनैव पदार्थलक्षणमपि सूचितं वेदितव्यम् । 'पदस्यार्थः पदार्थ' इति व्यत्पत्त्या पदाभिधेयत्वं लभ्यते । तत्र पदनिरूपितत्वांशस्य अव्यावर्तकत्वेन त्यागे अभिधेयत्वं पदार्थसामान्यलक्षणमुक्तं भवति । एवमग्रेऽपि विभागवाक्य एव लक्षणं सूचितं बोध्यम् । अधिकं तत्र तत्रैव विव्रियते । अभिधेयः पदार्थ इति लक्षणावल्यामुदयनाचार्याः।
3. यद्यपि तर्कसङ्ग्रहादिषु प्रकरणेषु, द्रव्यगुणादिरूपेण सप्तधा पदार्थविभागो दृश्यते । तथापि भावाभावभेदेन विभागः वैशेषिकदर्शनसम्मतः, ज्ञानवैशद्यमपि तनोतीत्ययं विभजनक्रमः आदृतः । लक्षणमालाग्रन्थे उदयनाचार्यैः प्रथमं भावानां, तदनन्तरं चाभावानां पृथक् विभजनपूर्वकम् अयमेव क्रमः स्वीकृतः । लक्षणावल्यां तु स्पष्टं भावाभावत्वेनैव विभागः कृतः । मुक्तावल्यामपि ग्रन्थान्तरेषु इव भावाभावत्वेन विभागः कुतो न कृतः ? इत्याशङ्क्य, अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तमिति समाधाय, तेन पृथगुपन्यासः (भावाभावत्वेन) न कृतः इति उक्त्या भावाभावत्वेन विभागः कृतप्राय एव ।
4. भावत्वं च विधायकप्रमाणगोचरत्वमिति लक्षणमालायाम् उदयनाचार्याः । विधायकप्रमाणं च अस्तीत्याकरकम् । इत्थं च अस्तीत्याकारकप्रमाविषयत्वं भावत्वमित्युक्तं भवति । यद्यपि अभावोऽपि अस्तीति प्रतीयते, तथापि द्वितीयादिप्रतीतावेव तथा । प्रथमप्रतीतौ तु अभावः नास्तीति निषेधमुखेन, भावस्तु अस्तीति विधिमुखेन प्रतीयते इति भेदः । 'घटो नास्ति' इसेवाभवस्य प्रतीतेः । समवायैकार्थसमवायान्यतरसम्बन्धेन सत्तावत्वं भावत्वम् । तदभावोऽभावत्वमिति दिनकर्यां निरूपितम् । नञर्थविषयत्वरहितप्रत्यय-विषयत्वं भावत्वमिति लक्षणावली । भावत्वमखण्डोपाधिरिति केचित् ।
5. प्रागभावप्रतियोगित्व-ध्वंसप्रतियोगित्वैतदुभयाभावः नित्यत्वम् ।

उत्पत्तिनाशरहितत्वं नित्यत्वम्। पृथिवीजलतेजोवायूनां शरीरेन्द्रियविषयाः[6] अनित्याः[7]। उत्पत्तिविनाशवदनित्यम्।

पृथिवीशरीरं[8] चतुर्विधम्। जरायुजमण्डजं स्वेदजमुद्भिज्जमिति। जरायुजं मनुष्यादीनाम्। अण्डजं पक्ष्यादीनाम्। एतदुभयं योनिजम्। स्वेदजं मत्कुणादीनाम्। उद्भिज्जं वृक्षादीनाम्। एतद्द्वयमयोनिजम्। पार्थिवेन्द्रियं [9]घ्राणम्। नासाग्रवर्ति। गन्धं [10]गृह्णाति। घटादयः पार्थिवविषयाः। उपभोगसाधनं विषयः[11]।

जलशरीरं वरुणलोके। जलेन्द्रियं रसनं जिह्वाग्रवर्ति। रसं गृह्णाति। सरिदादयो जलविषयाः।

तेजःशरीरं सूर्यलोके। इन्द्रियं चक्षुः। कृष्णताराग्रवर्ति। रूपं गृह्णाति। तेजोविषयस्तु भौमो वह्न्यादिः। दिव्यो विद्युदादिः। उदरस्थः औदर्यः। स्वर्णादिलोहो मण्यादिश्चाकरजः।

वायुशरीरं पिशाचादीनाम्[12]। वायवेन्द्रियं त्वक्। स्पर्शं गृह्णाति। सर्वशरीरवृत्ति। प्राणादिर्झञ्झावातादिर्विषयः।

कर्णान्तरावच्छिन्नाकाशश्रोत्रम्[13]। शब्दं गृह्णाति।

आकाश-काल-दिशः एकैके। कालदिशौ सर्वाधारौ, सर्वकार्यनिमित्त-कारणे[14] च।

---

6. यद्यपि शरीरेन्द्रियभिन्नमात्रस्य विषयत्वेन, पृथिवीजलतेजोवायूनां परमाणवोऽपि विषयेष्वेवान्तर्भवन्ति इत्यतः पृथिवीजलतेजोवायूनां शरीरेन्द्रियविषयाः अनित्याः इत्युक्तिरसङ्गता, तथापि भोगावच्छेदकत्वं शरीरत्वं, भोगसाधनत्वमिन्द्रियत्वं, भोगकर्मत्वं विषयत्वमिति लक्षणानुसारं परमाणूनाम् अस्मदाद्यनुभवगोचरत्वाभावेन विषयत्वं नास्तीति तद्बहिर्भावेनैव विषयाणामनित्यत्ववचनम्। लक्षणावल्यां कार्यं त्रिविधं शरीरादिभेदेन इति विषयस्य अनित्येष्वेव परिगणना कृता।
7. प्रागभावप्रतियोगित्व-ध्वंसप्रतियोगित्वान्यतरवत्वम् अनित्यत्वम्।
8. शरीरत्वं च अन्त्यावयवित्वे सति सुखदुःखसाक्षात्कारावच्छेदकत्वम्। पृथिवीशरीरलक्षणे गन्धवत्त्वे सतीति जलशरीरलक्षणे शीतस्पर्शवत्त्वे सतीत्यादि यथायोग्यं योजनीयम्।
9. इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्। तत्रापि शरीरलक्षणवत् तत्तद्द्रव्यगतविशेषगुणः विशेषणत्वेन योजनीयः। शरीरसंयुक्तमपरोक्षप्रतीतिसाधनमतीन्द्रियमिन्द्रियमिति लक्षणावली।
10. चक्षुस्त्वचौ एव द्रव्य-तद्गतगुणग्रहणे शक्नुतः। इतराणीन्द्रियाणि तु केवलं गुणग्रहण एव समर्थानि।
11. उपभोगसाधनत्वमिति विषयलक्षणे साधनत्वं तु विषयस्यापि ज्ञानकारणत्वमभिप्रेत्येति द्रष्टव्यम्। उपभोगः अनुभवः, तद्विषयत्वमेव विषयलक्षणम्। प्रतीयमानतया भोगसाधनं विषय इति लक्षणावली।
12. तथा वैशेषिकाः।
13. यद्यप्याकाशे घटाकाशमठाकाशादिः, काले क्षणघटिकादिः, दिशि प्राच्यादिः भिन्नत्वेन प्रतीयते; तथापि स सर्वोऽपि औपाधिक इति आकाशकालदिशः स्वावान्तरभेदरहिताः इति न्यायमतम्।
14. कार्यसामान्यनिरूपितकारणत्वम् ईश्वरदिक्कालादिषु अभ्युपगतमवसेयम्।

आत्मा द्विविधः - ईश्वरो जीवश्चेति। ईश्वर[15] एकः। जीवा[16] अनेके।

आकाशकालदिगात्मानो विभवः। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्[17]।

मनांस्यनेकानि, अणूनि। अन्तरिन्द्रियाणि। एकैकस्मिन् जीवे एकैकं मनः नियतम्।

पृथिवीजलतेजोवाय्वाकाशानि पञ्च भूतानि। पृथिवीजलतेजोवायुमनांसि पञ्च मूर्तानि[18]।

[19]गन्ध-स्नेह-उष्णस्पर्श-अपाकजानुष्णाशीतस्पर्श-शब्दसमवायिकारणतया[20] पृथिवी-जल-तेजो-वायु-आकाशसिद्धिः। परत्वापरत्वप्रयोजकतया कालदिक्सिद्धिः। क्षित्यङ्कुराद्यनुमेय ईश्वरः[21]। "अहं सुखी" इतिमानसप्रत्यक्षसिद्धो जीवः[22]। सुखादिसाक्षात्कारकरणतया मनःसिद्धिः[23]।

द्रव्यं तु [24]यथायोगं संयोगसमवायाभ्यां द्रव्यमात्रवृत्ति। नित्यद्रव्याणि कुत्राप्यवृत्तीनि[25]। अवयवावयविभावः पृथिवीजलतेजोवायूनामेव[26]।

---

15. नित्यज्ञानेच्छाकृतिमत्त्वम् ईश्वरत्वम्। तद्भिन्नचेतनत्वं जीवत्वम्।
16. जीवः प्रतिशरीरं भिद्यत इत्यनेके जीवाः। कार्यानुमानेन सिध्यन् ईश्वर एक एव।
17. परममहत्परिमाणवत्त्वं सर्वमूर्तद्रव्यसंयोगित्वं वा विभुत्वम् इत्यन्यत्र।
18. बहिरिन्द्रियग्राह्यविशेषगुणाश्रयत्वं भूतत्वम्। अपकृष्टपरिमाणवत्त्वं क्रियावत्त्वं वा मूर्तत्वम्।
19. गन्धसमवायिकारणतया पृथिव्याः, स्नेहसमवायिकारणतया जलस्य, उष्णस्पर्शसमवायिकारणतया तेजसः, अपाकजानुष्णाशीतस्पर्शसमवायिकारणतया वायोः, शब्दसमवायिकारणतया आकाशस्य च सिद्धिः यथासंख्यान्वयेन ज्ञेया। पृथिवीसाधनानुमानक्रमस्तु - गन्धः किञ्चित्समवायिकारणकः गुणत्वाद् गुणान्तरवत् इति समवायिकारणविशेषे सिद्धे, तद्द्रव्यं क्षुप्तद्रव्यान्तरं न भवति, गन्धस्य तत्राप्रतीयमानत्वादिति परिशेषतः पृथिवीसिद्धिः। एवं द्रव्यान्तरसिद्धिरपि द्रष्टव्या। यद्यपि पृथिव्यादीनाम् अनुभवगोचराणाम् अनुमानात्साधनं व्यर्थम्; तथापि पृथिव्यादीनां दृग्गोचराणामपि एकाकाराभावेन एकधर्मावच्छिन्नत्वेन विविच्य ग्रहणं दुःशकमिति अनुमानात् सिद्धिरिष्यते।
20. परत्वापरत्वे च दैशिककालिकपरापरव्यवहारहेतू गुणौ। विशेषणतया परप्रत्ययनिमित्तं परत्वम्; तथैवापरप्रत्ययनिमित्तमपरत्वमिति लक्षणावल्याम्।
21. क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवत् इति अनुमानं ईश्वरसाधकम्।
22. अहमित्याकारकमानसप्रत्यक्षविषयो जीवः। तत्र सुखं दुःखं ज्ञानम् इच्छा कृतिरित्यादयो गुणाः प्रकारतया भासन्ते।
23. मनःसिद्धिः - सुखादिसाक्षात्कारः सकरणकः कार्यत्वाद् साक्षात्कारत्वाद्वा इत्यनुमानेन मनसः सिद्धिः।
24. द्रव्ययोरेव संयोग इति संयोगेन सम्बन्धेन द्रव्याश्रयः द्रव्यमेव भवति नान्यत्। एवं द्रव्यं समवायेन स्वावयवे द्रव्ये तिष्ठति। तस्मात् संयोगसमवायाभ्यां द्रव्यं द्रव्यमात्रवृत्ति।
25. "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते" इति कारिकवली। तस्मात् अनाश्रितत्वं नित्यद्रव्यधर्मः।
26. अनित्यद्रव्येष्वेव अवयवावयविभाव इति भावः।

गुणक्रिये द्रव्यमात्रवर्तिनी यथायोगम्[27]। न तु गुणादिषु[28]।

जातिस्तु द्रव्यगुणक्रियासु। न सामान्यादौ[29]। नित्या। उपाधिः[30] स्वरूपसम्बन्धेन सर्वपदार्थवृत्तिरनित्यः। उभयमप्यनुगतं सामान्यम्।

विशेषाः नित्यद्रव्यमात्रवृत्तयः।

समवायस्तु प्रतियोगितयाऽनुयोगितया[31] वा द्रव्यगुणक्रियाजातिविशेषेषु। अवयव-अवयविनोः गुण-द्रव्ययोः कर्म-द्रव्ययोः जाति-व्यक्त्योः विशेष-नित्यद्रव्ययोश्च सम्बन्धः समवायः।

[32]अभावस्तु सर्वपदार्थेषु स्वरूपसम्बन्धेन वृत्तिः।

[33]सम्बन्धो द्विविधः - वृत्तिनियामको वृत्त्यनियामकश्चेति। [34]वृत्तिनियमाकस्तु समवायः संयोगः[35] स्वरूपसम्बन्धश्चेति त्रिविधः। स्वरूपसम्बन्धश्च प्रतियोग्यनुयोगिभावविषयविषयिभावादिरनेकविधः। वृत्त्यनियामकस्तु स्वाश्रिताश्रितत्वाद्यनेकविधः कल्पनीयः।

[36]गन्धरसरूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-गुरुत्वद्रवत्वस्नेहशब्द-बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः।

---

27. यथायोगमिति न सर्वेषु द्रव्येषु सर्वे गुणाः क्रियाश्च सम्भवन्तीति द्योतनाय। यथा आकाशादिषु न क्रिया नापि रूपादिगुणाः सन्ति।
28. न गुणकर्मणोः गुणकर्मणी स्वीकृते।
29. न जातौ जातिरनवस्थानात्। न विशेषेषु जात्यङ्गीकारः स्वतोव्यावर्तकत्वरूपविशेष-स्वरूपहानेः। एवं समवायाभावयोरपि नैव जातिरभ्युपगता, तयोः समवायाभावात् इति जातिबाधकसंग्रहे स्थितम्।
30. धर्मो द्विविधः - सामान्यं विशेषश्चेति। तत्र सामान्यं पुनः द्विविधम् - जातिरुपाधिश्चेति। पदार्थत्वादिकं तु सामान्यम् उपाधिरिति स्वीक्रियते इति भावः।
31. जातौ विशेषेषु च प्रतियोगितयैव समवायोऽस्ति, न तु अनुयोगितया। तेषां समवायेन यथायोग्यं द्रव्यादिषु सत्त्वेऽपि, तेषु समवायेन न किञ्चिदस्ति।
32. नञर्थप्रत्ययबोध्यत्वमभावस्य लक्षणमिति लक्षणावल्याम्।
33. धर्मो द्विविधः - एकधर्म्याकाङ्क्षः, अनेकाकाङ्क्ष इति। तत्र अनेकसाकाङ्क्षो धर्मः सम्बन्ध इति गीयते। विशिष्टबुद्धिनियामको धर्मः सम्बन्ध इति लक्षणम्।
34. वृत्तिराधेयता, तन्नियामकः सम्बन्धः समवायः संयोगः स्वरूपं चेति त्रितयमेव। यस्मिन् सम्बन्धे सति द्वयोः पदार्थयोः आधाराधेयभावः, प्रतीयते, स सम्बन्धो वृत्तिनियामकः। यथा भूतलघटसंयोगेन भूतले घट इति आधाराधेयभावः प्रतीयते। समवायेऽप्येवमेव घटे रूपमित्यादिप्रतीतिः। स्वरूपे सति भूतल-घटाभावयोः भूतले घटाभाव इति आधाराधेयभावः प्रतीयते।
35. क्वचित् सत्यपि संयोगे अञ्जलिबन्धे समसूत्रपातेन स्थितयोः हस्तयोः आधाराधेयभावः न प्रतीयत इति तत्रस्थसंयोगः न वृत्तिनियामकः।
36. यद्यपि वैशेषिकनयग्रन्थेषु रूपरगन्धस्पर्शेतिरीत्या गुणानां गणना दृश्यते। तथापि गन्धरसरूपस्पर्शशब्देति-क्रमव्यत्ययेन पृथिवीजलतेजोवायुनभसां द्रव्याणां गणनामनुसृत्य तद्गतविशेषगुणानां क्रमशः संख्यानं कृतम् इति ध्येयम्।

गन्धो द्विविधः - सुरभ्यसुरभीति। पृथिव्यामेव, अनित्यः।

रसः षड्विधः - मधुराम्ललवणकटुकषायतिक्ता इति। पृथिव्यां षडपि अनित्याः। मधुरेव जले, परमाणौ नित्यः, अन्यत्रानित्यः।

रूपं सप्तविधम् - शुक्लनीलपीतरक्तहरितकपिलचित्राणीति। पृथिव्यां सप्ताप्यनित्यानि। [37]जलतेजसोः शुक्लम् एव। परमाणुषु नित्यम्। अन्यत्रानित्यम्[38]।

स्पर्शस्त्रिविधः - शीतमुष्णोऽनुष्णाशीतमिति। जले शीतं, परमाणौ नित्यमन्यत्रानित्यम्। तेजस्युष्णः, नित्ये नित्यः, अनित्येऽनित्यः। अनुष्णाशीतं पृथिव्यामनित्यमेव। वायौ तु नित्ये नित्यम्, अनित्येऽनित्यम्।

शब्दो द्विविधः - ध्वन्यात्मको वर्णात्मकश्चेति। आकाश एव। संयोगजो विभागजश्च।

संख्या त्वेकत्वादिपरार्धपर्यन्ता। सर्वद्रव्येषु। तत्रैकत्वं नित्ये नित्यमनित्ये त्वनित्यम्। द्वित्वादिकं[39] तु सर्वत्रानित्यमेव। अपेक्षाबुद्धिजन्यत्वात्, तन्नाशनाश्यत्वाच्च।

परिमाणं चतुर्विधम् - अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेति। सर्वद्रव्यवृत्ति। परमाणुत्वं मूर्तेषु, परममहत्त्वं विभुषु च नित्यम्। दीर्घत्वं ह्रस्वत्वमनित्यद्रव्येषु मध्यमाणुत्वमहत्त्वे च। अणुकादौ संख्याजन्यम्[40]। घटादौ परिमाणजन्यम्। तूलादौ प्रचयजन्यम्। शिथिलसंयोगः प्रचयः। अस्य सर्वस्याश्रयनाशान्नाशः।

---

37. जलेऽभास्वरशुक्लं, तेजसि भास्वरमिति विवेकः।

38. पृथिव्यां परमाणावपि पाकेन विपरिणामात् स्पर्शादिः गुणः अनित्यः वेदितव्यः।

39. इयमत्र द्वित्वोत्पत्तिप्रक्रिया। प्रथमं प्रत्यक्षेणैकत्वनिर्विकल्पकम्। तदनन्तरमेकत्वविशिष्टधीः। ततो द्वित्वोत्पत्तिः। तदनु द्वित्वनिर्विकल्पकम्। ततो द्वित्वविशिष्टज्ञानम्। तदनु विशेषणतावच्छेदकप्रकारकज्ञान-जन्यं द्वे द्रव्ये इति विशिष्टज्ञानं भवति। अपेक्षाबुद्धिः त्रिक्षणावस्थायिनी चतुर्थक्षण एव नश्यति। तदुक्तमुदयनाचार्यैः लक्षणावल्याम्-

आदाविन्द्रियसंनिकर्षघटनादेकत्वसामान्यधीः
एकत्वद्वयगोचरा मतिरतो द्वित्वं ततो जायते।
द्वित्वत्वप्रमितिस्ततोऽपि परतो द्वित्वप्रमानन्तरम्
द्वे द्रव्ये इति धीरियं निगदिता द्वित्वोदयप्रक्रिया।

40. परमाणौ अणुत्वं नित्यम्। द्व्यणुके च तत् अनित्यम्; परमाणुगतसंख्याजन्यम्। न च वाच्यम्, परमाणुगताणुत्वपरिमाणमेव द्व्यणुकगतपरिमाणकारणं किं न स्यादिति। "कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः" इति उदयनाचार्यैः अणुपरिमाणस्य कुत्राप्यकारणत्वस्य सिद्धान्तितत्वात्। एवं त्र्यणुकेऽपि महत्वं ह्रस्वत्वं दीर्घत्वं वा द्व्यणुकगतसंख्याधीनमेव, न तु तत्परिमाणाधीनमिति ज्ञेयम्। घटादौ द्रव्ये तदवयवगतपरिमाणजन्यं भवति महत्त्वम्। तूलादौ दीर्घत्वह्रस्वत्वे प्रचयजन्ये।

[41]पृथक्त्वं नित्यगतं नित्यम्, अनित्यगतमनित्यम्। द्विपृथक्त्वादिकं तु सर्वत्रानित्यमेव। सर्वद्रव्यवृत्ति। अपेक्षाबुद्धितन्नाशाभ्यामुत्पत्तिनाशवत्।

द्रव्ययोरेव संयोगः। कर्मजः संयोगजश्च[42]। सर्वद्रव्यवृत्तिः। कर्मजो द्विविधः - अभिघातो नोदनश्चेति। शब्दहेतुरभिघातः। क्रियाहेतुर्नोदनम्। सर्वोऽप्यनित्यः सम्बन्धरूपः क्रियानाश्यश्च। विभूनां परस्परसंयोगो नास्ति[43]।

विभागः सर्वद्रव्यवृत्तिरनित्यः कर्मजो विभागजश्च।

परत्वम् अपरत्वं च पृथिवीजलतेजोवायुमनःसु। कालिकं दैशिकं च अनित्यमेव। कालिक-परत्वापरत्वे बहुतराल्पतरसूर्यपरिस्पन्दज्ञानजन्ये[44]। कालपिण्डसंयोगोऽसमवायिकारणम्। दैशिकपरत्वापरत्वे[45] तु सूर्यसंयोगबहुत्वाल्पत्वज्ञानजन्ये। दिक्पिण्डसंयोगोऽसमवायिकारणम्। अपेक्षाबुद्धिनाशान्नाशः।

[46]गुरुत्वं पृथिवीजलयोः[47]। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। आद्यपतनेऽसमवायि-कारणम्। द्वितीयादिपतनेऽपीति केचित्।

[48]द्रवत्वं द्विविधम् - सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। नैमित्तिकं पृथिवीतेजसोरनित्यमेव। [49]स्यन्दनासमवायिकारणमुभयम्।

स्नेहो जलमात्रवर्ती। परमाणौ नित्यः अन्यत्रानित्यः। चूर्णादिपृथिव्या अत्यन्त-संयोगेऽसमवायिकारणम्।

---

41. इदमस्मात् पृथक् इति व्यवहारस्तु द्रव्ये एव भवति। इतरेषां पदार्थानां गुणादीनां द्रव्यं विहाय पृथक्सिद्धेरभावात्। तस्मात् पृथक्त्वमन्योन्याभाव एव किं न स्यादिति केषांचन वादः अतीव मन्दः।

42. हस्तपुस्तकसंयोगः हस्तप्रसारणरूपकर्मजन्यः। शरीरपुस्तकसंयोगस्तु हस्तपुस्तकसंयोगजन्यः।

43. विभूनां परस्परं संयोगः कैश्चिन्नैयायिकैरभ्युपगतः। अपरैश्च कैश्चिन्नेति तत्त्वम्।

44. बहुतरसूर्यपरिस्पन्दकालवृत्तिरयम्, अल्परतसूर्यपरिस्पन्दकालवृत्तिरयम् इति ज्ञानेन कालिकपरत्वापरत्वे जायेते। ततश्च परोऽयम् अपरोऽयमित्यादयो व्यवहाराः।

45. बहुलसूर्यरश्मियोगवानयं, अल्पसूर्यरश्मिसंयोगवानयमित्यादिना ज्ञानेन दैशिकपरत्वापरत्वे जन्येते। ततश्च परापरव्यवहारः।

46. गुरुत्वं तु अतीन्द्रियं पतनादिनाऽनुमीयते।

47. वायावपि गुरुत्वमनुभूयत इति आधुनिकाः।

48. तेजःसंयोगादिनिमित्तं द्रवत्वं (नैमित्तिकं) घृतादौ पृथिव्याम्, सुवर्णादौ तेजसि च बोध्यम्।

49. स्यन्दनं च जलस्रवणम्, प्रवहतीति प्रतीतिसिद्धं कर्म।

बुद्धिर्ज्ञानम्[50]। स्मृतिरनुभवश्चेति द्विविधम्। [51]स्मृतिर्द्विविधा - यथार्थायथार्थभेदात्। अनुभवोऽपि यथार्थोऽयथार्थश्च[52]। उभयोऽप्यनुभवश्चतुर्विधः[53]-प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। यथार्थप्रत्यक्षज्ञानं[55] सविकल्पकं निर्विकल्पकं[54] च। अन्यत्सर्वज्ञानं सविकल्पकमेव[56]। आत्ममात्रवृत्ति। तत्रेश्वरस्य प्रत्यक्षात्मकमेव ज्ञानं नित्यं च। अन्यत्सर्वं जीवज्ञानमनित्यम्। भ्रमाभ्रामभ्यां भिन्नं निर्विकल्पकमिति केचित्[57]।

[58]अयथार्थानुभवस्त्रिविधः-विपर्ययः संशयस्तर्कश्चेति। विपर्ययो निश्चयरूपः। स्वप्नो मानस-विपर्ययः[59]।

---

50. बुद्धिर्ज्ञानमित्यत्र बुद्धिरिति लक्ष्यं निर्दिश्य ज्ञानमिति ज्ञानत्वं ज्ञानसामान्यलक्षणमुच्यते।
51. भावनारूपसंस्कारमात्रजन्यं ज्ञानं स्मृतिः। यथार्थानुभवजनितसंस्कारजन्या यथार्थस्मृतिः, अयथार्थानुभवजनितसंस्कारजन्या तु अयथार्था इति विवेकः।
52. अनुभवे याथार्थ्यं च तद्वति तत्प्रकारकत्वरूपम्। अयाथार्थ्यं च तदभाववति तत्प्रकारकत्वम्।
53. यद्यपि तर्कसंग्रहादिषु प्रमाणानामेव चातुर्विध्यमुक्त्वा तत्करणानि प्रमाणानि चत्वारि इति निरूपितमस्ति; तथापि अनुभवस्य यथार्थायथार्थभेदेन उभयरूपस्य चातुर्विध्योक्तिः अयथार्थानुभवस्यापि दुष्टेन्द्रिय-लिङ्गाभास-दुष्टोपमान-शब्दाभासैः जायमानस्य अनुभवसिद्धत्वेन युक्ता एव।
54. सप्रकारकं ज्ञानं सविकल्पकम्, निष्प्रकारकं तु निर्विकल्पकम्।
55. यथार्थप्रत्यक्षज्ञानं सविकल्पकं निर्विकल्पकं चेत्यत्र यथार्थेति सम्पातायातम्। निर्विकल्पके यथार्थत्वायथार्थत्वयोरभावात्। तत्र विषयाणां मिथोऽविशिष्टानां भानात्। तथा च प्रत्यक्षज्ञानं सविकल्पकं निर्विकल्पकं चेति द्विविधम्। अत एव मणिकारोऽपि निर्विकल्पकं न प्रमा नाप्यप्रमा इत्याह। विश्वनाथपञ्चाननः तु भ्रमभिन्नं ज्ञानं प्रमेति स्वीकृत्य निर्विकल्पकस्यापि प्रमात्वमभ्युपैति। तन्मतरीत्या इदं वाक्यं यथाऽस्ति तथाऽस्तु।
56. अनुमित्यादिज्ञाने तु निर्विकल्पकसविकल्पकभेदो नास्ति। पक्ष-साध्ययोः, संज्ञासंज्ञिनोः, पदार्थानां च मिथः संबन्धज्ञानत्वेन तेषां स्वभावतः सविकल्पकत्वात्।
57. भ्रमाभ्रमाभ्यां भिन्नं निर्विकल्पकमिति मणिकारमतम्।
58. मिथ्याज्ञानं विपर्ययः भ्रान्तिरन्यथाख्यातिरित्यनर्थान्तरम्। तदभाववति तत्प्रकारकः अनुभवो विपर्ययः। यथा शुक्तौ इदं रजतमिति ज्ञानम्। न्यायमतरीत्या अन्यत्र स्थितस्य वस्तुनः अन्यत्र भानमेव विपर्ययः। आपणादौ स्थितं रजतमेव शुक्तौ भासत इत्यतः शुक्तौ रजतज्ञानं भ्रमः।
59. स्वप्नः मानसः भ्रमानुभव इति न्यायसिद्धान्तः। परन्तु तर्कभाषायां केशवमिश्रेण "स्वप्ने तु सर्वमेव ज्ञानं कारणम् अयथार्थं च। दोषवशेन तदिति स्थाने इदमित्युल्लेखात्" इति लिखितम्। तन्मते स्वप्नः [illegible]तिरूपोऽयथार्थश्च।

विरुद्धयोरेकत्र ज्ञानं संशयः[60]। भावाभावयोरेव विरोधः। तर्कस्तु क्वचिद्व्यभिचार-शङ्कानिवर्तकः[61]।

धर्मेण जन्यं सुखम्[62]। अधर्मेण जन्यं दुःखम्[63]। जीवमात्रवृत्ती, द्वे अनित्ये च।

सुखज्ञानादिच्छा[64]। ईश्वरे जीवे चानित्या।

दुःखज्ञानजन्यो द्वेषः। जीवमात्रवृत्तिरनित्यः।

प्रयत्नस्त्रिविधः[65] - प्रवृत्तिः निवृत्तिर्जीविका चेति। सुखोपायज्ञानजन्या कृतिः प्रवृत्तिः। दुःखोपायज्ञानजन्या निवृत्तिः। शरीरे प्राणसंचारकारणं जीविका। प्रवृत्तिर्निवृत्तिश्च जीवेश्वरोभयवृत्तिः[66]। जीविका तु जीवमात्रवृत्तिः[67]। सर्वोऽप्यनित्य एव।

---

60. विरुद्धयोः असमानाधिकरणयोः धर्मयोः, एकत्र धर्मिणि ज्ञानं संशय इत्यर्थः। असमानाधिकरणौ च धर्मौ भावाभावावेव। तस्मात् एकस्मिन् पदार्थे भावाभावात्मकविविधकोटिकं ज्ञानं संशय इति विश्वनाथपञ्चाननस्य मतम्। तद्रीत्या अयं वृक्षो न वा, पुरुषो न वा इति वृक्षत्व-तदभाव-पुरुषत्व-तदभावकोटिचतुष्टयावगाही संशयः। अन्नंभट्टमते तु अयं पुरुषो वृक्षो वा इति पुरुषत्व-वृक्षत्वकोटिद्वयावगाही भवितुमर्हति। विश्वनाथमतमेवात्र नवनीतकारेण अपि समाश्रितमित्यवधेयम्। संशयस्य च समानधर्मेत्यादि कारणपञ्चकं निरूपितं महर्षिणा गौतमेन (न्या.द.1.1.23), तथा भासर्वज्ञेन स्वकीयन्यायसारग्रन्थे।

61. तर्कः आरोपरूपः स्वयमप्रमाणमपि प्रमाणानाम् अनुग्राहकः। प्रमाणमीमांसायामस्ति तस्य महत्स्थानम्। व्याप्यारोपेण व्यापकारोपस्तर्कः। अनिष्टापादनरूपः। यथा - "यदि पर्वते वह्निः न स्यात्, तर्हि धूमोऽपि न स्यात्" इति। तर्कस्तु व्यभिचारशङ्कां निवर्तयति। विस्तरस्तु उदयनाचार्याणां न्यायकुसुमाञ्जलौ तृतीयस्तबके "व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः" इत्यत्र द्रष्टव्यः।

62. सुखं तु स्वरससुन्दरम् इष्टं भवति। लक्षणावल्यां तु यस्मिन् सत्यनुरागः तत्सुखमिति सुखं व्याख्यातम्। तत्रैव प्रकाशे अन्येच्छानधीनेच्छाविषयः सुखमिति निपुणतरं न्यरूपि। धर्मेण जन्यमिति सुखकारणं धर्म इत्युच्यते। आह्लादः सुखमिति लक्षणमालायाम्।

63. पीडा दुःखम्। अन्यद्वेषानधीनद्वेषविषयो दुःखम् इति लक्षणावलीव्याख्या। दुःखस्वरूपे ज्ञाते इदं मे मा भवतु इति द्वेषः, तद्विषयो दुःखम्, न तत्र अन्यद् - द्वेषः कारणम्, किन्तु दुःखज्ञानादेव दुःखं मे न भवतु इति अन्यद्वेषानधीनद्वेषविषयो दुःखमिति लक्षणसमन्वयः।

64. अनुरागः इच्छा। सुखज्ञानात् इच्छौत्पत्तिः। इच्छा तु जीवेऽनित्या, ईश्वरेऽपीति वचस्तु आश्चर्यमावहति। कार्यानुमानेन धर्मिग्राहकेण सिध्यन् ईश्वरः नित्यज्ञानेच्छाकृतिमत्त्वेनैव सिद्ध इति तस्येच्छा एका नित्या च भवति। ईश्वरे ज्ञानेच्छाकृतीनां नित्यत्वाङ्गीकारे सृष्टेः कादाचित्कत्वाय जानाति इच्छति यतते इति ज्ञानेच्छाकृतीनां क्रमः सम्पादनीयः। स च क्रमः तासामनित्यत्व एव भवतीति अनित्यत्वमङ्गीकार्यं भवति। तन्मनसि निधाय इदमुदितं स्यादित्यपि विभाव्यते। अथवा ईश्वरे नित्या जीवे चा नित्या इति भवेत्।

65. "प्रयतः द्विविधः जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च" इति।

66. ईश्वरे सुखदुःखयोरेवाभावेन कथं तदुपायेषु प्रवृत्तिः निवृत्तिर्वा तस्येति प्रवृत्तिः निवृत्तिश्च जीवेश्वरोभयवृत्तिः इति वाक्यं चिन्त्यम्। अथ वा सृष्टयादौ प्रवृत्तिर्गाह्या।

67. ईश्वरस्य शरीराभावेन प्राणसंचरणोपायभूतजीविकारूपः प्रयत्नः अपि न भवति इति भावः।

धर्मः पुण्यम्। अधर्मः पापम्। उभयमदृष्टमित्युच्यते। जीवमात्रवृत्ति अनित्यं च। वासनाजन्यं परस्परनाश्यं ज्ञाननाश्यं च [68]।

संस्कारस्त्रिविधः - भावना वेगः स्थितिस्थापकश्चेति। भावना जीवमात्रवृत्तिः, अनित्या। स्मृतौ प्रत्यभिज्ञायां च हेतुः। अनुभवजन्या, क्वचित्स्मृतिजन्या च। वेगः मूर्तद्रव्येषु कर्मजो वेगजश्चानित्यः क्वचिद्द्वितीयादिपतनासमवायिकारणम्। स्थितिस्थापकः पृथिव्याम्। मूर्तेष्विति केचित्। क्वचित्स्यान्दनहेतुर्नित्यः[69]।

अथ संगृह्योच्यते। विशेषगुणास्तु गन्धरसरूपस्पर्शशब्दस्नेहसांसिद्धिक-द्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना इति षोडश[70]।

सामान्यगुणास्तु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व-नैमित्तिकद्रवत्ववेगस्थितिस्थापका इत्येकादश।

चक्षुस्त्वग्भ्यां ग्राह्यास्तु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-द्रवत्वस्नेहा इति नव।

बाह्यैकैकेन्द्रियग्राह्यास्तु गन्धरसरूपस्पर्शशब्दा इति पञ्च[71]।

मनोग्राह्यास्तु[72] सविकल्पकज्ञानसुखदुःखेच्छाद्वेषप्रवृत्तिनिवृत्तयः सप्त।

अतीन्द्रियास्तु निर्विकल्पकज्ञानगुरुत्वधर्माधर्मजीविकाख्यकृतिसंस्काराः इन्द्रियगताः सर्वेऽपि शब्दं विना। स्थितिस्थापकभावने अतीन्द्रिये। वेगस्तु द्वीन्द्रियग्राह्य इति केचित्। स्थितिस्थापकोऽपि द्वीन्द्रियग्राह्य इत्यपि केचित्।

---

68. अदृष्टं कर्मणा जायते, पुनरनुभवेन नश्यति इति अनित्यम्। न केवलमनुभवेन अपि तु प्रारब्धकर्मणः अन्यस्य तत्वज्ञानेन भगवतः अपरोक्षेण विनाश इति वेदान्तिनां मतम्। वेदान्तवासनया अदृष्टं ज्ञाननाश्यं इति लिखितं स्यात्। किं च, पापम् अधिकपुण्येन, पुण्यं च बलवता पापेन नश्यति इति तु धर्मशास्त्रसिद्धं नैयायिकैरप्यङ्गीक्रियते। अदृष्टस्य वासनाजन्यत्वं तु कथमिति चिन्त्यम्।

69. स्यन्दनहेतुः परमाणौ स्थितः अवयविनि स्थितिस्थापकहेतुर्नित्य इति स्यात्। मूर्तेष्वति प्र.पा.भा.

70. रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥
इति अन्यत्र विशेषगुणसंग्राहिका कारिका।

71. घ्राणग्राह्यो गन्धः। रसनग्राह्यो रसः। चक्षुर्ग्राह्यं रूपम्। त्वचा ग्राह्यः स्पर्शः। श्रोत्रग्राह्यः शब्दः।

72. निर्विकल्पकज्ञानस्य विशिष्टज्ञानानुमेयस्य अतीन्द्रियत्वेन सविकल्पकज्ञानस्यैव मनोग्राह्यत्वमुक्तम्। प्रवृत्ति-निवृत्ती प्रयत्ने अन्तर्भवतः।

अव्याप्यवृत्तयस्तु[73] शब्दसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेष-प्रयत्नधर्माधर्मभावना इति द्वादश।

क्षणिकास्तु[74] शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना इति दश।

सविषयकास्तु ज्ञानेच्छाकृतिद्वेषभावनाः पञ्च।

कारणगुणोद्भवास्तु[74अ] अपाकजानि गन्धरसरूपस्पर्शद्रवत्वानि, परिमाणैकपृथक्त्व-गुरुत्वस्नेहवेगस्थितिस्थापकाश्चेत्येकादश। स्वसमवायिसमवायि-कारणवृत्तिस्वसजातीयगुणजन्यत्वं कारणगुणोत्पन्नत्वम्। साजात्यं च केवलव्याप्यशुक्लत्वादिना[75]।

शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः अकारणगुणपूर्वकाः। स्वाश्रयगुणैरेव[76] जन्यत्वात्।

संख्यापरिमाणद्विपृथक्त्वसंयोगविभागपरत्वापरत्वापरत्वानि कारणजन्यानि अकारणगुणजन्यानि च न स्युः। कर्मज्ञानादिजन्यत्वात्।

ज्ञानेच्छाकृतिसुखदुःखद्वेषधर्मभावनानामात्मविशेषगुणानां क्षणिकत्वेन [77]यौगपद्या-भावान्नासमवायिकारणत्वम्। किन्तु निमित्तकारणत्वमेव। एवं शब्दस्यापि। विभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वनियमात्। असमवायिकारणनाशात्कार्यनाशनियमाच्च।

असमवायिकारणीभूतगुणास्तु गन्धरसरूपस्पर्शपरिमाणैकत्वैक-पृथक्त्वस्नेहाः।

शब्दोऽपि शब्दान्तरं प्रतीति केचित्। उष्णस्पर्शसंयोगविभागगुरुत्व-द्रवत्ववेगस्थितिस्थापकानामसमवायिकारणत्वं निमित्तकारणत्वं च। द्विपृथक्त्वादिपरत्वापरत्वानां निमित्तकारणत्वमेव।

गन्धरसरूपस्पर्शा एव पृथिव्यां पाकजा[78] अपाकजाश्च। अन्ये अपाकजाः। जलादिष्वपाकजा एव।

---

73. अव्याप्यवृत्तित्वं च स्वाभावाधिकरणवृत्तित्वम्।

74. क्षणिकत्वं स्वोत्पत्तितृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। शब्दादयः न्यायमते तृतीयक्षणे नश्यन्ति। योग्य-विभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वनियमात्। तथा च क्षणद्वयावस्थायिनः ते क्षणिकाः इत्युच्यन्ते।

75. कार्ये विद्यमानाः गन्धादयः कारणवस्तुनिष्ठगुणाद् असमवायिकारणाद् जायन्ते। पाकजास्तु ते कारणगुणनिरपेक्षं जायन्त इति तत्त्वम्।

75. न तु गुणत्वादिना व्यापकधर्मेण। तथात्वे संख्यादीनाम् अकारणगुणोत्पन्नत्वं न स्यादित्युत्तरेणान्वयः।

76. स्वाश्रये ये गुणाः तैः जन्यत्वादित्यर्थः।

77. यौगपद्यम् समानकालीनत्वम्।

78. पाकः रूपादिपरिवर्तकः विलक्षणतेजःसंयोगः।

पृथिव्यामेव पाकः। परमाणुपाको वैशेषिकमते। नैयायिकमते द्व्यणुकादावेव पाकः। अपाकजानामनित्यद्रव्यवृत्तिविशेषगुणानां यावद्द्रव्यभावित्वम्। द्वित्वादयः अपाकजाश्च। विभुगुणास्तु शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना इति दश।

गन्धरसरूपस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकाः मूर्तमात्रगुणाः एकादश।

संख्यापरिमाणपृथक्त्वसंयोगविभागाः सर्वद्रव्यवृत्तयः। पृथिवीगुणास्तु गन्धरसरूपस्पर्श-संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-गुरुत्वद्रवत्ववेगस्थितिस्थापका[79] इति पञ्चदश। जलगुणास्तु रसरूपस्पर्शसंख्या-परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वसांसिद्धिकद्रवत्व-स्नेहवेगा इति चतुर्दश। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिक-द्रवत्ववेगा एकादश तेजोगुणाः। वायुगुणास्तु स्पर्शसंख्यापरिमाणपृथक्त्वसंयोग-विभागपरत्वापरत्ववेगा इति नव। आकाशगुणास्तु संख्यापरिमाणपृथक्त्वसंयोग-विभागशब्दा इति षट्। संख्यापरिमाण-पृथक्त्वसंयोगविभागाः पञ्च दिक्कालयोः। परमात्मगुणास्तु संख्यापरिमाणपृथक्त्वसंयोग-विभागज्ञानेच्छाप्रयत्नान्यष्टौ[80]। जीवगुणास्तु संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेष प्रयत्नधर्माधर्मभावना इति चतुर्दश। मनोगुणास्तु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगा इत्यष्टौ। अतीन्द्रियाः सर्वेऽनुद्भूताः। इन्द्रियग्राह्याः उद्भूतगुणाः[81]।

॥ इति गुणनिरूपणम्॥

कर्म पञ्चविधम् - उत्क्षेपणापक्षेणाकुञ्चनप्रसारणगमनानीति। मूर्तद्रव्यवर्ति।

सामान्यं द्विविधम् - जातिरुपाधिश्चेति। उभयमपि त्रिविधम्। व्याप्यं[82] व्यापकमुभयात्मकं चेति। केवलव्याप्या घटत्वादिः। केवलव्यापका[83] सत्ता द्रव्यगुणकर्मवृत्तिः। द्रव्यत्वादिकं तु व्याप्यं

---

79. स्थितिस्थापको पृथिव्यां नेति कारिकावली। प्रशस्तपादो विरुणद्धचेतद् - "स्थितिस्थापकस्तु स्पर्शवद् द्रव्येषु वर्तमाना" इति पृ. 633
80. कथं प्रयत्नानि इति।
81. द्रव्यप्रत्यक्षप्रयोजकः रूपनिष्ठः धर्मविशेषः उन्द्भूतत्वमिति अन्नम्भट्टमतम्। उन्द्भूतत्वं न जतिः। शुक्लत्वादिव्याप्यं अनुन्द्भूतत्वं नानाः। तदभावकूटवत्वमुन्द्भूतत्त्वमिति दीपिकायाम्। तस्मात् प्रत्यक्षाः सर्वे गुणा उन्द्भूता इति तु चिन्त्यम्।
82. व्याप्यम् अपरम्, व्यापकं - परम्; उभयात्मकम् - परापरम् सामान्यमित्यर्थः। घटत्वं व्याप्यम् सर्वजातिभ्यो न्यूनवृत्तित्वात्। सत्ता व्यापिका (परा) सर्वजातिभ्योऽपि अधिकदेशवृत्तित्वात्। पृथिवीत्वादि च उभयात्मकम्; सत्तातो न्यूनवृत्तित्वात्, घटत्वादितोऽधिकवृत्तित्वाश्च।
83. व्यापिका इति भवेत्।

व्यापकं च। उपाधिरपि त्रिविधः। तत्र केवलव्याप्यः समवायत्वादिः। स एव स खण्डोपाधिः। केवल-व्यापकः प्रमेयत्वादिः। उभयात्मकः अभावत्वादिः। एतदुभयमनुगतत्वादखण्डोपाधिरित्युच्यते। अल्पदेशवृत्तित्वं व्याप्यत्वम्। अधिकदेशवृत्तित्वं व्यापकत्वम्। त्वतलादिभावप्रत्ययः सामान्यवाचकः।

विशेषाः स्वतोव्यावर्तका अनेके नित्याश्च।

समवायो नित्यसम्बन्ध एक एव।

अभावश्चतुर्विधः - प्रागभावो ध्वंसोऽत्यन्ताभावोऽन्योन्याभावश्चेति।

नाशवानुत्पत्तिरहितः प्रागभावः। कार्योत्पत्तेः पूर्वं स्वप्रतियोगिसमवायिकारणेऽस्ति, प्रतियोगिनः कारणं च। उत्पत्तिनाशरहितो ध्वंसः। कार्योत्पत्त्यनन्तरः[84], प्रतियोगिसमवायिकारणवृत्तिः। प्रागभावध्वंसो ध्वंसप्रागभावश्च प्रतियोगिस्वरूपः। अत्यन्ताभावो नित्यः केवलान्वयी सामयिकाभाव इत्युच्यते। घटवत्यत्यन्ताभावप्रतीतौ घटभूतलसंयोगादिः प्रतिबन्धकः। अन्योन्याभावो भेदः। अत्यन्ताभावाभावः प्रतियोगिस्वरूपः। अतिरिक्त इति नव्याः। भेदाभावः प्रतियोगितावच्छेदकस्वरूपः। भेदात्यन्ताभावयोः प्रतियोगिताच्छेदकप्रतियोगिभ्यां विरोधः।

॥ इति पदार्थनिरूपणम्॥

## उद्देशलक्षणादिनिरूपणम्

उद्देशलक्षणविभागपरीक्षाभिर्वस्तुनिश्चयः। वस्तुप्रतिपादकनाममात्र-कीर्तनमुद्देशः। सकललक्ष्यवृत्तिः लक्ष्येतरावृत्तिः[85] धर्मो[86] लक्षणम्। [87]व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्।

लक्षणदोषास्त्वव्याप्त्यतिव्याप्त्यसम्भवाः। लक्ष्यैकदेशावृत्तिरव्याप्तिः। अलक्ष्येऽपि

---

84. कार्यनाशोत्पत्त्यनन्तर इति वा।

85. लक्ष्येतरावृत्तिः इत्यस्य लक्ष्यमात्रवृत्तिः इत्यर्थः। असाधारणधर्म इति यावत्।

86. यद्यपि असाधारणधर्मो लक्षणमिति सिद्धान्तः। तथापि असाधारणत्वं च लक्ष्यतावच्छेदकसमनियतत्वम्; तदेव हि सकललक्ष्यवृत्तित्वे सति लक्ष्येतरावृत्तित्वम् इति युज्यतेऽत्र तथा निरूपणम्।

87. व्यावृत्तिः = लक्ष्यम् इतरभिन्नमिति ज्ञानम्। इदं च ज्ञानं लक्षणज्ञानाद् भवति। गौः इतरभिन्ना सास्नादिमत्त्वादिति खलु अनुमानं लक्षणज्ञानात् प्रवर्तमानं गवि लक्ष्ये इतरभेदानुमितिं जनयति। व्यवहारः = शब्दप्रयोगः। पुरोवृत्तिनि गोपिण्डे इयं गौः इत्याकारकशब्दप्रयोगं प्रति इयं गौः इति गोत्वप्रकारकं गोविशेष्यकं ज्ञानं कारणम्। तद्धर्मावच्छिन्नबोधकशब्दप्रयोगं प्रति तद्धर्मप्रकारकव्यवहर्तव्यविशेष्यकज्ञानस्य कारणत्वात्। इयं गौः इत्याकारकज्ञानं च गोत्वपरिचायकलक्षणज्ञानं विना न संभवतीति लक्षणस्य व्यवहारः परम्परया फलम्।

वृत्तिरतिव्याप्तिः । लक्ष्यमात्रावृत्तिः असंभवः । उद्दिष्टं लक्ष्यम् । [88]यथा गोः शबलत्वं शृङ्गित्वम् एकशफवत्त्वं च[89] ।

कृतिजन्यं प्रागभावप्रतियोगि वा कार्यम् ।

## कार्यकारणनिरूपणम्

कार्यान्वयव्यतिरेकि[90] कारणम् । दण्डादि[91] ।

कारणं द्विविधं - साधारणमसाधारणं चेति । कालदिगदृष्टानि कार्यसामान्यं प्रति कारणत्वात्साधारणानि[92] । व्यक्तिशः[93] कारणमसाधारणं दण्डादि ।

## समवाय्यादिकारणनिरूपणम्

पुनः कारणं त्रिविधं - समवाय्यसमवायिनिमित्तानीति । समवायेन कार्याधिकरणं[94] समवायिकारणम् । पटं प्रति तन्तवः । द्रव्यमेव समवायिकारणम् । समवायेन स्वाश्रयसमवायेन वा कार्याधिकरणे[95] समवायेन स्थितं कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य । गुणकर्मणी एवासमवायीनि । एतदुभयकारणताभिन्नकारणतावन्निमित्तकारणम् । दण्डादि सर्वमपि ।

---

88. दोषत्रयस्योदाहरणमाह यथेति ।

89. अत्र यथासंख्यं शबलत्वमव्याप्तं, शृङ्गित्वमतिव्याप्तम्, एकशफत्वमसंभवि इति बोध्यम् ।

90. कार्यान्वयव्यतिरेकित्वं च कार्यान्वयव्यतिरेकसहचारज्ञानजन्यज्ञानविषयी-भूतव्याप्तिकत्वम् । समन्वयस्तु इत्थम्, अन्वयः भावः, व्यतिरेकः अभावः, सहचारः सामानाधिकरण्यम् । कार्येण सह कारणस्य, कार्याभावेन सह कारणाभावस्य सामानाधिकरण्यग्रहेण च कार्यकारणयोः व्याप्तिज्ञानं जायते । इदमेव नियतान्वयव्यतिरेकसहचारज्ञानमित्युच्यते । तद्विषयीभूतव्याप्तिनिरूपकत्वमेव कारणत्वमिति । यथा घटं प्रति दण्डः कारणमित्यत्र दण्डसद्भावे एव घटः, दण्डाभावे च घटाभावः दृष्ट इति घटः दण्डव्याप्तः इति व्याप्तिज्ञानं जन्यते । ततश्च घटरूपकार्यनिष्ठायाः व्याप्तेः निरूपकः दण्डः इति दण्डः घटकारणमित्युच्यते । एतदेव प्रकारान्तरेण प्रकरणान्तरे कार्यनियतपूर्ववृत्तित्वमित्युक्तम् । तत्र नियतत्वं च व्यापकत्वमिति उभयोः लक्षणयोः ऐक्यं ज्ञेयम् ।

91. यथा दण्डादि इति भाव्यम् ।

92. ईश्वरोऽपि कार्यसामान्यकारणेषु अन्तर्भवति ।

93. अत्र व्यक्तिशः कारणमिति कार्यत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणता एव उच्यते, न तु तत्तद्व्यक्तिं प्रति कारणत्वम् । यद्यपि दण्डादयः घटविशेषाणामेव कारणानि । तथापि दण्डत्वेन सामान्यधर्मेण दण्डाः घटसामान्यं प्रत्येव कारणानि इति व्यवहारानुगुणम् अनुगतकार्यकारणभावो निरूप्यते ।

94. समवायेन कार्याधिकरणे तादात्म्येन कारणस्य सत्त्वेन कार्यकारणयोः सामानाधिकरण्यं बोध्यम् । यथा समवायेन पटाधिकरणे तन्तौ तन्तोस्तादात्म्येन वृत्तेः तयोः सामानाधिकरण्यम् ।

95. कार्यं पटः समवायेन यस्मिन्नस्ति, तत्रैव कारणीभूतः तन्तुसंयोगः समवायेनेति सामानाधिकरण्यं ज्ञेयम् । तथा, कार्यं पटरूपं स्वाश्रयीभूतस्य पटस्य समवायेन अधिकरणे तन्तौ स्वाश्रयसमवायेन वर्तते । तत्रैव कारणीभूतं तन्तुरूपं समवायेन यत्र अस्ति इति सामानाधिकरण्यम् अवधेयम् ।

## करणनिरूपणम्

व्यापारवदसाधारणकारण करणम्[96] । यथा दण्डस्य घटकरणत्वे भ्रमिर्व्यापारः । अन्त्यकारणं करणमिति नव्याः । समग्रसामग्रीसत्त्वेऽपि यत्सम्बन्धं विना न कार्योत्पत्तिस्तदन्त्यकारणम् । यथा घटं प्रति दण्डः । अनुमितिं प्रति लिङ्गपरामर्शः ।

## आनुषङ्गिकप्रमेयनिरूपणम्

परममहत्त्वपरिमाणं परमाणुपरिमाणं च न कस्यापिँ कारणम् । नित्यद्रव्याणामपि स्वोत्पन्नगुणकर्मणां समवायिकारणत्वम् ।[97]संस्कारस्यानादित्वम्[98] । अनादिभावस्य नित्यत्वम् । वासनाकालयोः[99] प्रवाहतो नित्यत्वम् । पार्थिवादिशरीरेषु[100] जलादीनां निमित्तत्वमेव । आत्मविशेषगुणानां[101] स्वोत्तरगुणनाश्यत्वनियमः ।

प्रमाकरणं प्रमाणं चतुर्विधम् प्रत्यक्षमनुमानमुपमानं शब्द इति । प्रत्यक्षज्ञाने करणं प्रत्यक्षप्रमाणम् । तच्च क्वचिदिन्द्रियं, क्वचिदिन्द्रियार्थसन्निकर्षः क्वचिज्ज्ञानम्[102] । इन्द्रियार्थसन्निकर्षात्

---

96. व्यापारवदसाधारणकारणस्य करणत्वे घटस्य दण्डः करणम्; चक्रभ्रमिः व्यापारः । अन्त्यकारणस्य करणत्वे चक्रभ्रमित्वेन करणमिति ध्येयम् । तथैव मूलं परिवर्तनीयम् यथाश्रुते च अनन्वयात् ।

97. संसारस्यानादित्वमिति भाव्यमिति भाति । ज्ञानजन्यस्य संस्कारस्य अनादित्वं कथं वा स्यात् ?

98. प्रागभावाप्रतियोगित्वं कारणशून्यत्वं वा अनादित्वम् ।

99. कप्रवाहमध्यपतितानेकप्रवाहिप्रतियोगिकप्रागभावावच्छिन्नकालावृत्तित्वानधिकरण ध्वंसप्रतियोगि-प्रवाहित्वम् । अनेकप्रवाहिप्रतियोगिकध्वंसावच्छिन्नकालावृत्तित्वानधिकरणप्रागभावप्रतियोगिप्रवाहित्वं वा ।

100. शरीरं पाञ्चभौतिकमित्युच्यते । तत्र सर्वेऽपि भूतपदार्थाः उपादानानीति भ्रमं वारयितुमाह - पार्थिवादि इति ।

101. आत्मविशेषगुणाश्च ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्काराः सप्त । तत्र संस्कारस्य स्वोत्तरगुणनाश्यत्वाभावेन योग्यविशेषगुणाः संस्कारेतरे षडेव ग्राह्याः ।

## प्रमाणनिरूपणम्

102. बहुषु प्रकरणेषु मुक्तावल्यादिषु इन्द्रियमेव प्रमाणतया, इन्द्रियार्थसंनिकर्षः व्यापारतया निरूप्यते । परन्तु तर्कभाषायां केशवमिश्रेणैव स्थलभेदेन प्रत्यक्षप्रमाणत्रैविध्यं निरूपितमस्ति । तथा हि - "किं पुनः प्रत्यक्षम् ? साक्षात्कारिप्रमाकरणं प्रत्यक्षम् । साक्षात्कारिणी प्रमा च द्विधा सविकल्पकनिर्विकल्पकभेदात् । तस्याः करणं त्रिविधम् कदाचिदिन्द्रियम्; कदाचिदिन्द्रियार्थसन्निकर्षः, कदाचिज्ज्ञानम् । कदा पुनरिन्द्रियं करणम् ? यदा निर्विकल्पकरूपा प्रमा फलम् । तथा हि आत्मा मनसा संयुज्यते; मन इन्द्रियेण, इन्द्रियमर्थेन । इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमात् । ततोऽर्थसन्निकृष्टेनेन्द्रियेण, निर्विकल्पकं नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति ज्ञानं जायते । तस्य ज्ञानस्येन्द्रियं करणम् । च्छिदाया इव परशुः । इन्द्रियार्थसन्निकर्षोऽवान्तरव्यापारः, च्छिदाकरणस्य परशोरिव दारुसंयोगः । निर्विकल्पकं ज्ञानं फलम्, परशोः छिदा । कदा पुनरिन्द्रियार्थसंन्निकर्षः करणम् ? यदा निर्विकल्पकानन्तरं, सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति विशेषणविशेष्यभावावगाहि-ज्ञानमुत्पद्यते, तदा इन्द्रियार्थसंन्निकर्षः करणम् । निर्विकल्पकज्ञानम् अवान्तरव्यापारः । सविकल्पकज्ञानं फलम् । कदा पुनः ज्ञानं करणम्? यदा उक्तसविकल्पकानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा निर्विकल्पकं ज्ञानं कारणम् । सविकल्पकज्ञानमवान्तरव्यापारः । हानादिबुद्धयः फलम्" इति ।

प्रथमं घटघटत्वयोर्वैशिष्ट्यानवगाहि-निर्विकल्पकज्ञानं जायते। ततः विशिष्टवैशिष्ट्यावगाहि "अयं घटः" इति ज्ञानं जायते। जात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात्[103]।

निर्विकल्पके इन्द्रियं करणं, संयुक्तसमवायादिर्व्यापारः। सविकल्पके सन्निकर्षः करणं, निर्विकल्पकं व्यापारः[104]। हानोपादानादिज्ञानेऽनुव्यवसाये च निर्विकल्पकं करणं, सविकल्पकं व्यापारः[105]।

प्रत्यक्षज्ञानं द्विविधम् - लौकिकमलौकिकं चेति। लौकिकं घ्राणजादिभेदेन षड्विधम्।

आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षमुत्पद्यते। येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनेन्द्रियेण तद्गता जातिस्तदभावश्च। क्रियाजातिसमवायादयः सर्वेऽपि योग्यवृत्तितयैव ग्राह्याः। रूपरूपत्वातिरिक्तं चक्षुर्गाह्यं यद्यत् तत्सर्वं त्वचा ग्राह्यम्। तत्रापि रूपं कारणम्। अतो न वायुः प्रत्यक्षविषय इति प्राञ्चः। नव्यास्तु[106] चाक्षुषे आलोकसंयोग उद्भूतरूपं च कारणम्। स्पर्शने उद्भूतस्पर्शः। "प्रभां पश्यामि" इतिवद् "वायुं स्पृशामि" इति प्रतीतेर्वायुः स्पार्शनविषय इति। त्वङ्मनःसंयोगश्चआत्मनःसंयोगो वा ज्ञानमात्रं प्रति कारणम्। महत्त्वं प्रत्यक्षसामान्ये कारणम्।

आत्मा मानसप्रत्यक्षविषयः।

लौकिकप्रत्यक्षे विषयेन्द्रियसन्निकर्षः षोढा। स एव व्यापारः। द्रव्यप्रत्यक्षे संयोगः। द्रव्यसमवेतप्रत्यक्षे संयुक्तसमवायः। द्रव्यसमवेतसमवेतप्रत्यक्षे संयुक्तसमवेतसमवायः। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः। शब्दसमवेतप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः। द्रव्ये अभावप्रत्यक्षे संयुक्तविशेषणता। द्रव्यसमवेते अभावप्रत्यक्षे संयुक्तसमवेतविशेषणता। रूपत्वादावभावप्रत्यक्षे संयुक्तसमवेतसमवेतविशेषणता। शब्दाभावप्रत्यक्षे श्रोत्रावच्छिन्नविशेषणता। घटाभावादावभावप्रत्यक्षे संयुक्तविशेषणविशेषणता। एवमूह्यम्।

अतीद्रियाणामभावो न प्रत्यक्षविषयः। अयोग्यत्वात्। एवं मानसप्रत्यक्षेऽपि[107]। द्रव्यचाक्षुषे

---

103. अनुल्लिखितजातेः स्वरूपेण भानम्; उल्लिखितायास्तु किञ्चित्प्रकारेणैवेति नियमात् अत्र नियमवाक्ये जातौ अनुल्लिखितेति विशेषणं देयम्।

104. द्र. पूर्वतनटिप्पणी 1021

105. अत्रानुव्यवसाये निर्विकल्पकं करणं, सविकल्पकं व्यापार इति यदुक्तं तच्चिन्त्यम्। अनुव्यवसाये मनः करणम्; मनआत्मसंयोग एव व्यापार इति सिद्धान्तसिद्धत्वात्।

106. के इति चिन्त्यम्।

107. यथासम्भवं सन्निकर्षाः मानसप्रत्यक्षे बोध्या इत्यर्थः। समवाय-समवेतसमवायानां तत्रासम्भवात्।

आलोकसंयोगावच्छिन्नचक्षुःसंयोगः कारणम्[108]। अभावप्रत्यक्षे योग्यानुपलब्धिः[109]। उपलब्धौ योग्यत्वं च प्रतियोगिसत्त्व-प्रसञ्जनप्रसञ्जितप्रतियोगिकत्वम्। आपाद्यमानोपलब्धिविषयसत्ताकत्वं प्रतियोगिनि योग्यत्वम्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता हेतुः। अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यता[110]।

अलौकिकप्रत्यक्षेऽपीन्द्रियं कारणम्। अलौकिकसन्निकर्षस्त्रिविधः- सामान्यलक्षणो ज्ञानलक्षणो योगजश्चेति। इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूत-धर्मज्ञानं सामान्यलक्षणा प्रत्यासत्तिः। यथा चक्षुःसन्निकृष्टधूमज्ञाने प्रकारीभूतधूमत्वज्ञानं सकलधूमविषयकौलौकिकप्रत्यक्षे प्रत्यासत्तिः। मानसे तु ज्ञानप्रकारीभूतसामान्यं सुखत्वादि। "सुरभिश्चन्दनखण्डः" इत्यादौ सौरभ्यज्ञानं, धूमत्वेन धूलीपटलज्ञानस्थलेऽपि धूलीपटलस्यानुव्यवसाये भानं च ज्ञानलक्षणयैव। योगजो योगाभ्यासजन्यः सिद्धिविशेषः[111]। सोऽपि द्विविधः- चिन्तासहकृतस्तदसहकृतश्चेति। एवमिन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।

॥ इति प्रत्यक्षप्रमाणनिरूपणम् ॥

व्याप्तिज्ञानमनुमितौ करणम्। परामर्शो व्यापारः।

अन्वयव्यतिरेकाभ्यां व्याप्तिर्द्विविधा। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। सा च साध्याभाववदवृत्तित्वं, हेतुव्यापकसाध्यसामानाधिकरण्यं वा। साध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरेक-व्याप्तिः। सा च साध्याभावव्यापकीभूताभाव-प्रतियोगित्वम्। हेतौ समन्वयः।

---

108. द्रव्यचाक्षुषे आलोकसंयोगावच्छिन्नचक्षुस्संयोगः कारणमित्युक्तम्। तत्र आलोक-संयोगावच्छिन्नमित्यस्य आलोकसंयोगविशिष्टमित्यर्थः। यदा चक्षुषा ज्ञानं जननीयं, तदा चक्षुष आलोकसंयोगेन न किञ्चिद् भवति; किन्तु अर्थोपरि एव आलोकः अपेक्षितः। इत्थं च चक्षुषि आलोकसंयोगवैशिष्ट्यं च किंरूपमिति चेत् सहकारित्वेन वैशिष्ट्यम् इति वदामः। चक्षुषा ज्ञानं जननीयं चेद्, अर्थालोकसंयोगः सहकारी भवति इति।

109. अभावप्रत्यक्षे योग्यानुपलब्धिः कारणमित्युक्तम्। उपलब्धौ योग्यत्वं च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित-प्रतियोगिकत्वम्। अनुपलब्धिश्च उपलब्ध्यभावः। तत्प्रतियोगिनी उपलब्धिः। सा च यस्याभावस्य प्रत्यक्षं जननीयं, तत्प्रतियोगिसत्त्वप्रसञ्जनेन प्रसज्यते। तथाहि - घटाभावस्य प्रत्यक्षे योग्या घटानुपलब्धिः कारणम्। घटाभावस्य प्रतियोगी घटः। यदा तन्नोपलभ्यते तदा यद्यत्र घटः स्यात् तर्हि उपलभ्येत इति तर्केण अभावीय-प्रतियोगिन सत्त्वप्रसङ्गेन घटोपलब्धिः आपाद्यते। तादृशम् अभावप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित-प्रतियोगिकत्वमेव अनुपलब्धौ योग्यत्वं बोध्यम्। ततः घटाभावादेः प्रत्यक्षं भवति।

न केवलमनुपलब्धौ किन्तु अभावप्रतियोगिनोऽपि योग्यत्वमपेक्ष्यते। तच्च आपाद्यमानोपलब्धि-विषयसत्ताकत्वमित्युक्तम्। यद्यत्र घटः स्यात् तर्हि उपलभ्येत इति तर्केण आपाद्यमाना या उपलब्धिः तद्विषयीभूता या घटसत्ता; तादृशसत्ताकत्वं प्रतियोगिनि घटे भवतीति घटः योग्यः प्रतियोगी।

110. स्तम्भः पिशाचो न भवतीत्यत्र भेदप्रतियोगिनः पिशाचस्य अयोग्यत्वेऽपि भेद प्रत्यक्षमुत्पद्यत इत्यतः अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता अपेक्ष्यत इति सुष्ठूक्तम्। परं, संसर्गाभावप्रत्यक्षे अधिकरणस्यायोग्यत्वे कथम् अत्रेति अधिकरणभानम्? अत्रेति अधिकरणस्य प्रतीत्यभावे कथं संसर्गाभावप्रत्यक्षं तत्? इति तु विचारणीयम्।

111. योगजसिद्ध्या अतीन्द्रियाः परमाण्वादयोऽपि भासन्त इति वैशेषिकाणां मतम्।

अन्वयव्याप्तिज्ञानादन्वयपरामर्शः । स च "साध्यव्याप्यहेतुमान्पक्षः" "साध्यव्याप्यहेतुः पक्षे"इति द्विविधः । पक्षधर्मताद्वैविध्यात् । व्यतिरेकव्याप्तिज्ञानाद् व्यतिरेकपरामर्शः । सोऽपि पूर्ववद् द्विविधः । एवं चतुर्विधादपि परामर्शात् "पक्षः साध्यवान्" इत्येवानुमितिः ।

हेतोः पक्षवृत्तित्वं पक्षधर्मता । पर्वतो वन्हिमान् धूमात् । महानसमन्वयदृष्टान्तः[112] ।

तस्मादनुमितिकरणमनुमानम् । तच्च व्याप्तिज्ञानमिति सांप्रदायिकाः । लिङ्गपरामर्श इति नव्याः ।

तच्चानुमानं द्विविधम् - स्वार्थं परार्थं चेति ।

न्यायाप्रयोज्यं स्वार्थानुमानम् । न्यायप्रयोज्यं परार्थानुमानम् । अवयववाक्यपञ्चकं न्यायः । प्रतिज्ञा हेतुरुदाहरणमुपनयो निगमनमिति । पर्वतो वन्हिमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुवाक्यम् । यो यो धूमवान् स सोऽग्निमान् यथा महानसादिः । यो यो वन्ह्यभाववान् स धूमाभाववान् यथा ह्रद इति चोदाहरणम् । तथा च अयं, न तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् । एतद्वाक्यपञ्चकज्ञानात्परस्य "पर्वतो वह्निमान्" इत्यनुमितिरुत्पद्यते ।

पुनरनुमानं त्रिविधम् - कार्यानुमानं, कारणानुमानम्, अकार्यकारणानुमानमिति । हेतोः साध्यकार्यत्वे कार्यानुमानम् । यथा वन्हिमान् धूमात्[113] । कारणत्वे कारणानुमानम् - पुंस्त्वाभिव्यक्तिमान् यौवनादिति[114] । उभयाभावे सत्यकार्यकारणानुमानम् । रूपवान् रसात्[115] ।

पुनरप्यनुमानं त्रिविधम् - अन्वयव्यतिरेकि[116] केवलान्वयि केवलव्यतिरेकि चेति । अन्वयव्यतिरेकि - वह्निमान् धूमादिति । केवलान्वयि तु - घटोऽभिधेयः प्रमेयत्वात् । केवलव्यतिरेकि तु - पृथिवी इतरभिन्ना गन्धवत्त्वादिति ।

पुनरनुमानं द्विविधम् । दृष्टं सामान्यं च[117] । दृष्टानुमानं वह्निमान् धूमादित्यादि ।

---

अनुमानप्रकरणम्

112. महानसादिः सपक्षः, ह्रदादिः विपक्षः । द्वावपि दृष्टान्तौ भवतः । सपक्षः साधर्म्यदृष्टान्तः । विपक्षस्तु वैधर्म्यदृष्टान्तः ।

113. अत्र धूमः कार्यम्, वह्निः तत्कारणम् । कार्यभूतमनुमानं लिङ्गं कार्यानुमानम् । कार्येण हेतुनाऽनुमानं साधनमिति वा ।

114. पुंस्त्वाभिव्यक्तिमत्त्वं कार्यम् । यौवनन्तु कारणम् । कारणेन कार्यानुमानम् । कारणानुमाने, समग्रमेव कारणं कार्यमनुमापयति; कार्यानुमाने तु कार्यं यत्किञ्चिदपि कारणम् अनुमापयति ।

115. हेतु-साध्ययोः सर्वथा कार्यकारणभावाभावे च तृतीयम् ।

116. अन्वयेन व्यतिरेकेण च व्याप्तिमत् केवलान्वयि । अन्वयेन केवलं व्याप्तिमत् केवलान्वयि । व्याप्तिरेकमात्रेण व्याप्तिमत् केवलव्यतिरेकि ।

117. येन रूपेण साध्यहेतुभावः, तेनैव रूपेण व्याप्तिः दृष्टा चेत्, दृष्टानुमानम् । वह्निधूमयोस्तु यत्र धूमः तत्र वह्निरिति साध्यतावच्छेदक-हेतुतावच्छेदकरूपाभ्यामेव व्याप्य-व्यापकभावः इति वह्निसाध्यकधूमानुमानस्य दृष्टत्वम् ।

सामान्यमुखी व्याप्तिः[118] सामान्यानुमानम्। मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वात्। यद्यदन्याफलकत्वे सति सफलं तत्तत्फलकं, यथा स्वर्गफलको ज्योतिष्टोमः।

पक्षताश्रयः पक्षः। साध्यसंशयः[119], सिषाधयिषाविरहविशिष्टसिद्ध्यभावो वा पक्षता। इयमनुमितिं प्रति कारणम्। अनुमित्युद्देश्यो वा पक्षः[120]। अनुमितिविधेयं साध्यम्। पक्षे साध्यज्ञापकं हेतुः। व्याप्तिप्रदर्शनस्थलं दृष्टान्तः। साध्यसमानधर्मी सपक्षः। निश्चितसाध्याभाववान्विपक्षः। साध्यं तु हेतुव्यापकं हेतुसमनियतं वा। हेतुस्तु साध्यव्याप्यः साध्यसमनियतो वा[121]। हेतुसाध्ययोः कार्यकारणयोश्च सामानाधिकरण्यमावश्यकम्।

॥ इत्यनुमाननिरूपणम्॥

उपमितिकरणमुपमानम्। गवये गोसादृश्यज्ञानमुपमानम्। "गोसदृशो गवयपदवाच्यः" इत्यतिदेशवाक्यार्थस्मरणं व्यापारः। "इदमादिर्गवयपदवाच्यः" इति शक्तिग्रहः उपमितिः।

॥ इत्युपमाननिरूपणम्॥

शाब्दबोधकरणं शब्दः। आप्तोच्चरितवाक्यं प्रमाणम्। शब्दज्ञानं करणम्। वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः। शाब्दबोधः फलम्।

वृत्तिर्द्विधा - शक्तिर्लक्षणा चेति। शक्तिर्नाम पदेनार्थस्य सम्बन्धः संकेतरूपः[122]। तन्निरूपकं पदम्। तद्विषयोऽर्थः।

जात्याकृतिविशिष्टव्यक्तौ शक्तिः[123]। समानप्रकारकशक्तिज्ञानस्य पदार्थस्मरणशाब्दबोधौ प्रति कारणत्वात्।

"कोशव्याकृतिसादृश्यव्याख्यानव्यवहारतः।

आप्तवाक्याद्वाक्यशेषाच्छक्तिधीः सिद्धसन्निधेः[124]॥"

क्वचित्सति बाधके त्यज्यते। यथा "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इति कोशे

---

118. येन रूपेण हेतु-हेतुमद्भावः, तेन रूपेण व्याप्तिग्रहाभावेऽपि, तत्सामान्याकारेण व्याप्तिग्रहे च तादृशी व्याप्तिः सामान्यमुखीति उच्यते। तदालम्बनानुमानं च सामान्यमिति।

119. साध्यसंशयः पक्षता इति प्राचीनन्यायमतम्। सिषाधयिषाविरहविशिष्टसिद्ध्यभावः सा इति नवीनमतम्।

120. अनुमित्युद्देश्यत्वं पक्षत्वमिति तु द्वैतवादिमतवासनया प्रोक्तमिति भाति।

121. समनीत इति क्वचित् पाठः। तत्र समनीतं = समव्याप्तमित्यर्थः। समनियतमिति वा पाठः स्यात्।

122. संकेतश्च इच्छा। तत्र ईश्वरेच्छा शक्तिः, आधुनिकेच्छा च परिभाषा इति कथ्यते। इदं गदाधरभट्टाचार्यमतं शक्तिवादे स्पष्टम्।

123. घटादिपदानां जातिविशिष्टव्यक्तौ, राजादिपदानां च आकृतिविशिष्टे शक्तिरिति सम्प्रदायः।

124. कोशः = निघण्टुः। व्याकृतिः = व्याकरणम्। सादृश्यम् = उपमानप्रमाणम्। व्याख्यानं = समानार्थकशब्दान्तरप्रदर्शनम्। व्यवहारः = वृद्धप्रयोगः। सिद्धसन्निधिः = प्रसिद्धपदस्य अर्थात् ज्ञातार्थकस्य पदस्य सान्निध्यम्।

सत्यपि गौरवाद् गुणिनि शक्तिस्त्यज्यते। लक्षणा स्वीक्रियते। व्याकरणात्[125] "लः कर्मणि च" इति कर्त्राख्यातस्य कृतौ शक्तिरङ्गीक्रियते। रथो[126] गच्छतीत्यादावाख्यातस्य व्यापारे, जानाति करोतीत्यादावाश्रयत्वे, नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा। एवं सुबर्थोऽपि यथासम्भवमूह्यः। [127]व्यवहारस्तु प्रयोजकप्रयोज्यवृद्धयोः शब्दप्रयोगपूर्वकचेष्टा। तया बालस्य शक्तिग्रहः। वाक्ये निराकाङ्क्षितान्वयसमर्पकेऽपि सति तद्घटकपदार्थस्वरूपकथनं वाक्यशेषः। यथा "यवमयं चरुं निर्वपति" इति वाक्यस्य "माधवेऽन्या ओषधयो म्लायन्तेऽथैते मोदमाना इवोत्तिष्ठन्ति" इति वाक्यशेषः। तेन यवपदस्य दीर्घशूकव्रीहौ शक्तिग्रहः। हरिपदादौ विनिगमनाविरहान्नानाशक्तयः।

पदानि - यौगिकं रूढं योगरूढं यौगिकरूढमिति चत्वारि। समुदायशक्तिमात्रेणार्थबोधकं रूढम्। घटः। अवयवशक्तिमात्रबोधे यौगिकम्[128]। पाचकादि। उभयशक्त्या एकार्थबोधे योगरूढम्। पङ्कजादि। उभयशक्तिभ्यां भिन्नभिन्नार्थबोधे यौगिकरूढम्। कुशलादि। क्षेमे रुढिः। कुशादानकर्तरि योगः।

शक्यसम्बन्धो लक्षणा। सा द्विविधा - निरूढलक्षणा फललक्षणेति। "दयानिधिः" "नीलघटः"[129] इत्यादौ प्रयोजनरहिता बहुजनरूढिपूर्विकाऽद्या। "गङ्गायां घोषः" इत्यादौ सप्रयोजना फललक्षणा[130]।

पुनर्द्विविधा - जहत्स्वार्था[131] अजहत्स्वार्थेति। राजदन्तादित्वात्प्रथमा-तत्पुरुषः। शाब्दबोधे शक्यतदन्ययोरपि ग्रहणे अजहल्लक्षणा[132]। "काकेभ्यो दधि रक्ष" इत्यत्र दध्युपघातकत्वेन काकपदस्य

---

125. वैयाकरणैः यत्र आख्यातस्य कर्तरि कर्मणि भावे शक्तिः स्वीक्रियते, तत्र नैयायिकैः कर्तृत्वे कर्मत्वे भावे च शक्तिः स्वीक्रियते। कर्त्रादीनां शक्यत्वे शक्यतावच्छेदकगौरवात्।

126. रथो गच्छतीत्यादौ आख्यातस्य कृतौ शक्तस्य व्यापारे लक्षणा स्वीक्रियते। रथे जडे कृतेः आत्मगुणस्य बाधितत्वात्। एवं जानाति करोतीत्यादौ शक्यार्थकृतिः अनन्विता इति आश्रयत्वे लक्षणा स्वीक्रियते। तथैव नश्यतीत्यादौ प्रतियोगित्वे। तथैव सुबर्थस्थलेऽपि यत्र वैयाकरणैः कर्मादिषु शक्तिरित्युच्यते, तत्र नैयायिकैः कर्मत्वादिषु शक्तिरङ्गीक्रियते।

127. सादृश्यव्याख्याने न विवृते।

128. यद्यपि यौगिकं पदं पाचकादि पचतीत्यादिवत् शक्तपदद्वयसमुदायरूपत्वेन वाक्यतुल्यं भवति। तथापि शाब्दबोधजनकस्यैव वाक्यत्वेन पाचकादिपदस्य पचतीत्यादिवत् शाब्दबोधौपयिकप्रत्ययान्तत्वाभावात् न तत् वाक्यतुल्यमिति स्वीक्रियते। शाब्दबोधौपयिकप्रत्ययश्च सुप्प्रत्ययः तिङ्प्रत्ययश्च। विषयेऽस्मिन् मुक्तावलीप्रभाव्याख्यायां विस्तरशः द्रष्टव्यम्।

129. दयानिधिरित्यत्र तत्पुरुषे पूर्वपदे लक्षणा। "नीलघट" इत्यत्र नीलपदस्य नीलाभिन्ने लक्षणा इति उभयोः निरूढलक्षणा। निरूढत्वं लोकव्यवहारात्। अथ वा नीलः घटः इत्यत्र नीलपदस्य नीलगुणविशिष्टे लक्षणा इत्याशयः।

130. गङ्गायां घोष इत्यादयः प्रयोगाः तीरे शीतत्व-पावनत्वादिद्योतनायेति प्रयोजनं द्रष्टव्यम्।

131. स्वार्थं जहती = जहत्स्वार्था इति प्रथमातत्पुरुषः। दन्तानां राजा = राजदन्त इतिवत्।

132. यद्यपि गङ्गायां घोष इत्यादौ गङ्गापदस्य लक्ष्यार्थे तीरे शक्यार्थोऽपि भासते। तथापि सः अर्थः पदान्तरोपस्थाप्यार्थानुयोगिकान्वयप्रतियोगी नेतीत्येवम् इत्युच्यते।

बिडालादिषु लक्षणा। शक्यसम्बन्धस्तु "मुखं चन्द्रः" इत्यादौ सादृश्यरूपः। क्वचित् संयोगादिः[133]। द्विरेफादौ[134] परम्परासम्बन्धः। लक्षणाबीजं तु निरूढलक्षणायामन्वयानुपपत्तिः। फललक्षणायां तात्पर्यानुपपत्तिरिति केचित्[135]। सर्वत्र तात्पर्यानुपपत्तिरेवेति नव्याः। लाक्षणिकार्थस्य शाब्दबोधे पदान्तरं कारणम्[136]।

[137]अथाव्ययीभावे "उपकुम्भम्"[138] इत्यादौ कुम्भपदस्य तत्सम्बन्धिनि लक्षणा। तस्योपशब्दार्थे सामीप्यवत्यन्वयः। पूर्वपदार्थप्रधान्येन बोधः। प्राधान्यं चास्वपदार्थान्वयित्वम्[139]। तथाच सर्वसमासेषु प्रधानपदे लक्षणा। शेषं तात्पर्यग्राहकम्। अन्यपदार्थप्राधान्ये तु विशेष्यपदे। इतरेतरयोगद्वन्द्वे तु द्वित्वस्य प्रकारतया भानान्न लक्षणा।

कर्मधारयेऽपि नीलादेर्घटादावभेदसम्बन्धेन प्रकारतया भानान्न लक्षणा। "नीलो घटः" इति व्यस्ते तु निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्या-व्युत्पन्नत्वान्नीलपदस्य नीलविशिष्टे निरूढलक्षणा। वस्तुतस्तु बीजाभावे लक्षणाया अनावश्यकत्वेन "निषादस्थपतिं याजय" "ब्राह्मणपरिव्राजकान्भोजय" इत्यादिकर्मधारये न लक्षणा, नान्यत्रेति।

समासे कुत्रापि न शक्तिः। द्वन्द्वे प्रत्येकं शक्तिस्वीकारात्। सरूपैकशेषे न लक्षणा। विरूपैकशेषे उभयत्र लक्षणा। विग्रहवाक्याद्यादृशबोधः समासात्तद्विपरीतबोधः[140]।

शक्तिलक्षणे पदे एव, न वाक्ये। अनुमानेनैव निर्वाहात् व्यञ्जना न वृत्त्यन्तरम्।

---

133. गङ्गाप्रवाहस्य तीरे संयोगः।

134. द्विरेफ इत्यादौ स्ववाच्यरेफद्वयघटितपदवाच्यत्वं परंपरासम्बन्धः लक्षणा इति ज्ञेयम्। स्वं = द्विरेफपदम्। तद्वाच्यं = रेफद्वयम्। तद्घटितं पदं = भ्रमरपदम्। तद्वाच्यः कीटविशेषः इति सम्बन्धः।

135. केचित् के इति चिन्तनीयम्।

136. लाक्षणिकार्थस्य शाब्दबोधे पदान्तरं कारणमिति तु लाक्षणिकं पदं नानुभावकमिति वदतां प्राचीनानां मतम्। परन्तु कुमतिः पशुः इति सर्वलाक्षणिकस्थले शाब्दबोधस्यानुभवसिद्धत्वेन लाक्षणिकं पदमप्यानुभाविकमिति नव्याः।

137. तत्र उपपदार्थस्य प्रधानत्वात्।

138. उपकुम्भमित्यत्र अव्ययीभावस्य नित्यसमासत्वेन कुम्भस्य समीपमिति अस्वपदविग्रहवाक्यम्। कुम्भपदस्य कुम्भसंबन्धिनि लक्षणा। तस्य च उपपदार्थे समीपेऽभेदेन अन्वयः। इत्थं च कुम्भसम्बन्ध्यभिन्नं समीपमिति पूर्वपदार्थविशेष्यकः शाब्दबोध इति भावः।

139. अस्वपदार्थान्वयित्वं समासघटकपदार्थे प्राधान्यम्। समासघटकीभूतं यत् पदं, तदर्थभिन्नार्थान्वयित्वम् इत्यर्थः। यथा - शूरः राजपुरुषः इत्यत्र पुरुषपदार्थः, समासघटकीभूतपदार्थभिन्नः यः पदार्थः शूररूपार्थः तेन सह अन्वयं भजते इति पुरुषपदार्थः प्रधानः, न तथा राजपदार्थः तस्य तथाऽन्वयाभावात्।

140. विग्रहवाक्यात् यद्विशेषणविशेष्यभावापन्नः शाब्दबोधः समासात् तद्विपरीतविशेष्य-विशेषणभावापन्नः शाब्दबोध इति भावः।

आसत्तियोग्यताकाङ्क्षातात्पर्याणां ज्ञानं शाब्दबोधे कारणम्। यस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिरासत्तिः। एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता। येन पदेन विना यस्यान्वयबोधो न जायते, तेन तस्य योजनमाकाङ्क्षा। "द्वारम्" इत्युक्ते "पिधेहि" इत्यध्याहृतपदसत्त्वमावश्यकम्। शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणत्वात्। घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयाविभक्तिरूपाकाङ्क्षाज्ञानं कारणम्। वक्तुरिच्छा तात्पर्यम्। तत्र कारणं प्रकरणादिकम्। अत एव वेदस्य कर्ता ईश्वरः कल्प्यते[141]।

वेदस्त्रिविधः - विधिरर्थवादो मन्त्रश्चेति। विधिस्त्रिविधः - अपूर्वविधिर्नियमविधिः परिसंख्याविधिरिति। "स्वर्गकामो यजेत" इत्यपूर्वविधिः[142]। "व्रीहीनवहन्ति" इति नियमविधिः[143]। "पञ्च पञ्चनखा भक्ष्याः" इति परिसंख्या[144]।

अर्थवादस्त्रिविधः - गुणवादः[145] सिद्धवादो भूतार्थवादश्च। "यजमानः प्रस्तर" इति गुणवादः। "अग्निर्हिमस्य भेषजम्" इति प्रत्यक्षसिद्धानुवादः। "यौवने त्वामलभम्" इत्यादि[146] भूतार्थानुवादः।

मन्त्रस्तु "सत्यं ज्ञानमनन्तं ब्रह्म", "अग्निमीळे" इत्यादिः।

अभेदसंसर्गकशाब्दबुद्धिं प्रति समानविभक्तिकत्वं तन्त्रम्[147]। [148]भेदसंसर्गकशाब्दबोधे भिन्नविभक्तिकत्वम्। क्वचिदेकदेशान्वयोऽपि। धान्येन धनवान्[149]।

प्रथमान्तार्थमुख्यविशेष्यक एव बोधः। शब्दोपमानयोः पृथक्प्रामाण्यं नास्ति[150], शब्दत्वेनैवेति वैशेषिकास्तु शब्दोपमानयोरप्यनुमानविधया प्रामाण्यम्। ते पदार्थाः मिथः संसर्गवतः योग्यतादिमत्पदोपस्थापितत्वादिति।

---

141. तात्पर्यस्य शाब्दबोधकारणत्वेन कृप्तत्वात् वेदस्य वक्तुरभावे तात्पर्यज्ञानासंभवेन शाब्दबोधभावापत्तेः वेदस्य कर्तृत्वेन ईश्वरः अभ्युपेयते।

142. अग्निहोत्रं जुहोति इति अपूर्वविधिः। अप्राप्तस्य प्रापकः।

143. पक्षे, अप्राप्तस्य अवघातस्य प्रापको विधिः नियमविधिः।

144. परिसंख्या इतरव्यावृत्तिः तद्बोधको विधिः परिसंख्याविधिः। "शशकः शल्लकी गोधा कृकः कूर्मश्च पञ्चमः पञ्च पञ्चनखा भक्ष्याः। ब्रह्मक्षत्रेण राघव" एतत्पञ्चातिरिक्तपञ्चनखभक्षणं निषिध्यते।

145. गुणवादः = गुणं धर्मविशेषं निमित्तीकृत्य प्रवर्तमानः वादः।

146. तथा छान्दोग्ये सत्यकाम-हारिद्रुमतसंवादे ।

147. नीलो घटः इति अभेदसंसर्गकबोधजनकं वाक्यम्। अत्र नीलाभिन्नः घटः इति बोधः। घट-नीलपदयोः समानविभक्तिकत्वं च द्रष्टव्यम्।

148. भेदसंसर्गकबोधे = भेदव्याप्यनिरूपकत्वाधेयत्वप्रतियोगित्वादिसंसर्गकबोधे इत्यर्थः।

149. धान्येन धनवान् इत्यत्र तृतीयायाः अभेदः अर्थः। तत्र धान्यं प्रतियोगितानिरूपकत्वेनान्वेति। तादृशाभेदश्च धनपदार्थे धने अनुयोगितयाऽन्वेति। इत्थं च धान्याभिन्नधनवान् इति बोधः।

150. शब्दोपमानयोरित्यत्र शब्दत्वेनेति अनवधानपतितम्। इत्थं च "शब्दोपमानयोः पृथक्प्रामाण्यं नास्तीति वैशेषिकाः। शब्दोपमानयोः अपि अनुमानविधया प्रामाण्यमिति तन्मतम्।" इति पाठः बोध्यः।

अर्थापत्तेरनुमानेऽन्तर्भावः। देवदत्तो रात्रिभोजनवान् दिवा अभुञ्जानत्वे सति पीनत्वादिति। "विजयते" इत्यादौ क्रियासमानार्थकनिपातानां द्योतकत्वम्। अन्येषां वाचकत्वम्। इत्थं च प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि।

**इति श्रीकृष्णावधूतपण्डितविरचिते तर्कनवनीते प्रमाणनिरूपणं नाम द्वितीयगोलकम्॥**

तद्वति तत्प्रकारकत्वरूपं ज्ञानप्रामाण्यं न स्वतोग्राह्यम्। संशयानुपपत्तेः। ग्राह्यप्रामाण्याश्रयेऽप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वम्[151]। प्रमायाः गुणजन्यत्वमुत्पत्तौ परतस्त्वम्। जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे "पूर्वोत्पन्नज्ञानं, प्रमा, सफलप्रवृत्तिकत्वाद् व्यतिरेकेणाप्रमावत्" इत्यनुमानेन गृहीतत्वात्। प्रत्यक्षे विशेषणविशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानम्। उपमितौ यथार्थसादृश्यज्ञानम्। शाब्दबोधे यथार्थायोग्यताज्ञानम्। प्रकाराभावस्यानुव्यवसायेनानुपस्थितत्वादप्रामाण्यं परतोग्राह्यम्। दोषजन्यत्वमप्रमायाः उत्पत्तौ परतस्त्वम्।

प्रत्यक्षदोषाः पित्तसादृश्यसमानाभिघातादयः। मनोदोषाः रागादयः। अनुमानदोषाः हेत्वाभासाः। उपमानदोषो यत्किंचित्सादृश्यम्। शब्ददोषा असान्निध्यादयः।

"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम" इति न्यायसूत्रम्।

प्रमाणमुक्तं प्रत्यक्षादि[152]।

[153]आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः प्रमेयाणि द्वादश। [154]आत्मदुःखे उक्ते। शरीरं पार्थिवादि[155]। इन्द्रियं घ्राणादि[156]। अर्थो[157] घटादिः। बुद्धिरुक्ता[158] मन

---

अन्तिमगोलकम्

151. ज्ञानगतप्रामाण्यस्य स्वतोग्राह्यत्वं च ज्ञानग्राहकमात्रग्राह्यत्वम्। तथा च ज्ञानं येन अनुव्यवसायेन यदा गृह्यते, तेनैव तदृतप्रामाण्यमपि इति उक्तं भवति। एवं तर्हि न कदापि ज्ञाने प्रामाण्यसन्देहः स्यात्। अनुभूतश्च तथा सन्देह इति न ज्ञाने गृह्यमाणे प्रामाण्यं गृह्यते; अपि तु परीक्षया एव गृह्यते इति न्यायमतम्।
152. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि - (न्या.सू.1.1.3)।
153. आत्मशरीरेति न्यायदर्शनस्य नवमं सूत्रम्। (1.1.9)।
154. आत्मा च सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञो सर्वानुभवीति वात्स्यायनभाष्यम्।
155. आत्मनो भोगायतनं शरीरं पार्थिवादि इत्यर्थः।
156. भोगसाधनानि इन्द्रियाणि घ्राणादीनि इत्यर्थः।
157. अर्थो = इन्द्रियार्थो घटादिः विषय इत्यर्थः।
158. भोगो बुद्धिरिति न्यायभाष्यम्। भोगश्चात्र अनुभवः। ज्ञानं बुद्धिरित्युक्तं भवति।

उक्तम्। प्रवृत्तिः धर्माधर्मौ। दोषाः रागद्वेषमोहाः। प्रेत्यभावो मरणम्[159]। फलं कार्यम्[160]। अपवर्गो मोक्षः। स च एकविंशतिदुःखध्वंसः[161]। शरीरमिन्द्रियाणि विषयाः मनः बुध्यादि नवेत्येकविंशतिः[162]। ध्वंसस्त्वात्यन्तिकः।

संशय उक्तः[163]।

प्रयोजनं[164] दुखहानिः सुखप्राप्तिः।

दृष्टान्तो[165] महानसादिः।

सिद्धान्तस्तु प्रामाणिकत्वेनाभ्युपगतोऽर्थः[166]।

अवयवः[167] प्रतिज्ञादिः।

अप्रामाणिकव्याप्यस्याङ्गीकारे व्यापकस्यानिष्टस्यापादनं तर्कः। यथा पर्वते धूमोऽस्तु वन्हिर्मास्त्वित्युक्ते यदि वन्हिर्न स्यात्तर्हि धूमोऽपि न स्यात्। अत्र कार्यकारणभावो व्याप्तिश्च प्रतियोगिसत्तानिश्चायकः।

तर्कस्य पञ्चाङ्गानि। आपाद्यस्यापादकेन व्याप्तिः, प्रतितर्काप्रतिघातः, आपाद्यस्य विपर्यये पर्यवसानं, पराननुकूलत्वम् आपाद्यस्यानिष्टत्वं चेति। यदि वन्हिर्न स्यात्तर्हि धूमोऽपि न स्यादित्यत्र वन्ह्यभावधूमाभावयोर्व्याप्तिः। अस्य तर्कस्य प्रतिकूलतर्को नास्तीति प्रतितर्काप्रतिघातः - पर्वतो वह्न्यभाववान् प्रत्यक्षत्वात् ह्रदवदित्यत्राप्रयोजकशङ्कायां यदि वह्निमान् स्यात्तर्हि प्रत्यक्षः स्यादिति तर्कस्य विपर्ययपर्यवसाने, यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति प्रतितर्केण प्रतिघातोऽस्ति।

---

159. पुनरुत्पत्तिः प्रेत्यभाव इति (1.1.19) न्यायसूत्रम्। मृत्वा पुनर्जन्म इति भावार्थः भाष्यवर्णितः। तथा च अपवर्गान्तः जन्ममरणाभ्यासः प्रेत्यभाव इत्युक्तं भवति। ततश्च ग्रन्थोक्तः मरणमित्यर्थस्तु चिन्त्यः।
160. फलं कार्यमिति सामान्यवचनम्। सुखदुःखवेदनं फलमिति विशेषः।
161. दुःखं च पीडा तापः। यथोक्तं सूत्रे बाधनालक्षणं दुःखम् (1.1.21)
162. पञ्चेन्द्रियाणि, पञ्चार्थाः, शरीरं, मनः, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः इत्येकविंशतिः।
163. संशयस्तु समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः (1.1.23) इत्येवं लक्षितः।
164. यमधिकृत्य प्रवर्तते तत्प्रयोजनम् (1.1.24) इति न्यायसूत्रम्।
165. परीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः (1.1.25) न्यायसूत्रम्। पर्वते वह्नौ साध्ये महानसादिः दृष्टान्तो वेद्यः।
166. अस्त्ययमिति अनुज्ञायमानोऽर्थः सिद्धान्त इति प्रथमसूत्रीयभाष्यवचनम् इममेवार्थं गमयति।
167. अवयवः कपालादिरिति मातृकायाम् अन्यथाव्याख्यातम्। अवयवः प्रतिज्ञादिरिति तत्त्वम्। साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते, तस्यावयवाः प्रतिज्ञादयः।

अस्ति धूमः तस्माद्धूमवत्त्वात्पर्वते वह्निमत्त्वमित्यापाद्यस्य वन्ह्यभावस्य विपर्यये पर्यवसानम्। यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति वाद्युक्ततर्कस्य स्वानुकूलत्वं, शङ्कितुः प्रतिवादिनोऽननुकूलत्वम्।

शब्दस्य नित्यानित्यत्वविषये वादिप्रतिवादिनोरपि "यदि शब्दः नित्यः स्यात्तर्ह्याकाश-विशेषगुणो न स्यात्" "यद्यनित्यः स्यात्तर्ह्याकाशविशेषगुणो न स्यात्" इति तर्कद्वयस्याननुकूलत्वमेव नत्वनिष्टत्वमिति परानुकूलत्वापाद्यानिष्टत्वयोर्भेदः।

आपाद्यस्य धूमाभावादेः शङ्कितारं प्रत्यनिष्टत्वं, प्रत्यक्षसिद्धत्वेनाङ्गीकृतत्वात्। तच्चापाद्यानिष्टत्वं द्विविधम् - प्रामाणिकत्यागोऽप्रामाणिककल्पनं चेति। प्रत्यक्षादिप्रमाणानां चातुर्विध्येन प्रामाणिकहानमपि दृष्टहानानुमितहानोपमितहानश्रुतहानभेदाच्चतुर्विधम्। यदि भोजनं तृप्तिहेतुर्न तर्हि पुष्टिर्न स्यात् इति दृष्टहानन्। यदि रूपादिज्ञानं न स्यात्तर्हि चक्षुष्मानपि न स्यादित्यनुमितहानम्। अनुमानं तु अयं चक्षुष्मान् त्वगिन्द्रियसन्निकर्षाजन्यघटादिप्रत्यक्षवत्त्वादिति[168]। "आनन्दमयमात्मानमुपसंक्रम्य" इत्यत्र यद्यैक्यप्राप्तिरर्थः स्यात्तर्हि उपशब्दो न स्यादिति श्रुतहानम्।

अप्रामाणिककल्पनमष्टविधम्। आत्माश्रयत्वमन्योन्याश्रयत्वं चक्रकाश्रयत्वमनवस्था गौरवम्, अदृष्टकल्पनम्, अननुमितकल्पनम्, अभूतकल्पनं चेति। उत्पत्तौ ज्ञप्तौ च स्वस्य स्वापेक्षायाम् आत्माश्रयत्वम्। यद्ययं घटो घटजनकः स्यात्तर्हि स्वपूर्ववृत्तित्वं स्यादिति। द्वयोः परस्परसापेक्षत्वे अन्योन्याश्रयः। त्रयाणां परस्परसापेक्षत्वे चक्रिका। बहूनां सापेक्षत्वे तु न। ज्ञानस्य क्षणिकत्वात्। एकसिद्ध्यर्थमन्यापेक्षाया अपर्यवसायेऽनवस्था। गौरवमफलमुखम्। अश्रुतादृष्टकल्पनमेव कल्पनागौरवमिति केचित्[169]। यथा "तत्त्वमसि" इत्यत्र जीवब्रह्मैक्यकल्पने, पदद्वयलक्षणायाः, श्रुतिप्रत्यक्षयोरतत्त्वावेदकत्वस्य[170] च कल्पनायां गौरवम्। तत्पदस्य नियम्यादौ लक्षणाङ्गीकारे लाघवमिति। उपमानस्य शब्दविधयैव प्रामाण्यान्नोदाहृतम्[171]।

तर्कस्यानुमानेऽन्तर्भावान्न पृथक्प्रमाणता[172]। तथा हि। अनुमानं द्विविधम् - साधनानुमानं

---

168. किमुपमितहानं न निरूपितम् ग्रन्थ कृद्वदति उपमानस्य शब्दत्वमिति।
169. केचित् के न ज्ञायते।
170. तत्त्वावेदकत्वस्य अतत्त्वावेदकत्वस्य च इति स्यात्।
171. उपमानस्य शब्दविधयैव प्रामाण्यात् नोदाहृतम् इति न्यायमते कथमिति चिन्तनीयम्। किञ्च, तर्कस्य अनुमानेऽन्तर्भावान्न पृथक् प्रमाणता इत्यपि न्यायमतविचाराननुगुणम् इति स्पष्टम्। ग्रन्थकर्तुः द्वैतमतप्रभावेण एवं रीत्या प्रतिपादितं स्यादिति तर्कयामः। एतादृशानुमानविभागस्तु द्वैताचार्योपज्ञम् एव दृश्यते। प्रमाणपद्धतिः जयतीर्थकृताऽत्र द्रष्टव्या।
172. तर्को न प्रमाणसंगृहीतः, न प्रमाणान्तरम्, प्रमाणानामनुग्राहकः तत्त्वज्ञानाय कल्पते इति प्रथमसूत्रीयन्यायभाष्ये स्थितमत्र स्मर्तव्यम्।

दूषणानुमानमिति। स्वपक्षसाधनानुमानं - वह्निमान् धूमादिति। परपक्षदूषणानुमानं द्विविधम् - दोषप्रमापकं तर्कश्चेति। धूमवान्वह्नेरित्युक्ते वन्हिमत्त्वं न साध्यसाधकं, व्यभिचारित्वात् पृथिवीत्व-व्यभिचारिद्रव्यत्ववदिति दोषप्रमापकम्। इयमुक्तिर्न स्वपक्षसाधिका गौरवाद्यापादनादिति तर्कस्यानुमानविधया प्रामाण्यात्।

निर्णयो निश्चयज्ञानम्।

अनेकवक्तृकपूर्वोत्तरपक्षवाक्यसन्दर्भः कथा।

प्रमाणफलतत्त्वबुभुत्सूनां कथा वादः। उभयसाधनवती विजिगीषुकथा जल्पः। परपक्ष-प्रतिक्षेपमात्रं वितण्डा।

हेत्वाभासाः व्यभिचारादयः। हेतुत्वेन प्रत्युक्तानामाभासितत्वप्रयोजका दोषाः। ते पञ्च। अनैकान्तिकत्वं, विरोधः, सत्प्रतिपक्षत्वम्, असिद्धिः, कालात्ययापदिष्टत्वं चेति।

निश्चितनियतसाध्यसामानाधिकरण्यवानेकान्त एकान्तिको वा। स न भवतीत्यनेकान्तोऽ-नैकान्तिको वा। स त्रिविधः। व्यभिचारः साधारण्यम् असाधारण्यम् अनुपसंहारित्वं चेति। साधारण्यं यथा - धूमवान्वह्नेरित्यत्रायोगोलके वह्निसत्त्वेऽपि धूमाभावः। व्याप्तिज्ञानप्रतिबन्धकः। निश्चितहेतुमति साध्याभावसन्देह इव निश्चितसाध्याभाववति हेतुसन्देहेऽपि सन्दिग्धानैकान्त्यं व्याप्तिप्रतिबन्धकम्। हेतोः सपक्षावृत्तित्वमसाधारणत्वम्। व्याप्तिनिश्चयप्रतिबन्धकम्। नव्यास्तु सिद्धान्तव्याप्तौ साध्यसामानाधिकरण्यग्रहे प्रतिबन्धकमिति। साध्यस्य हेतोर्वा केवलान्वयित्वेऽनुपसंहारित्वम्। व्यतिरेकव्याप्तिग्रहप्रतिबन्धकम्। अयमनित्यदोषः। अन्वयव्याप्त्यैवानुमित्युत्पत्तेः। सर्वस्य पक्षत्वे दृष्टान्ताभावाद् व्याप्तिसंशयेन तन्निश्चयप्रतिबन्धकमिति प्राञ्चः।

हेत्वभावः साध्यव्यापकश्चेद्विरोधः। व्यतिरेकव्याप्तिज्ञानप्रतिबन्धकः। अन्ये तु हेतौ साध्याभावव्याप्यत्वं विरोध इति।

हेत्वन्तरे साध्याभावव्याप्यत्वं सत्प्रतिपक्षत्वम्। उभयोरपि साक्षादनुमितिप्रतिबन्धकत्वम्। तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्येव तदभावव्याप्यवत्तानिश्चयस्यापि प्रतिबन्धकत्वात्।

असिद्धिस्त्रिविधा - आश्रयासिद्धिः साध्यासिद्धिः हेत्वसिद्धिरिति। आश्रयासिद्धिः सप्तविधा - विवेकासिद्धिरज्ञानासिद्धिर्व्यर्थविशेषणासिद्धिर-प्रसिद्धविशेषणासिद्धिरयोग्यविशेषणासिद्धिः पूर्वत्वासिद्धिः पक्षत्वासिद्धिश्चेति। पर्वतवृक्षसमुदाययोर्विवेकाभावे विवेकासिद्धिः। पर्वतज्ञानस्यैवाभावे अज्ञानासिद्धिः। पाषाणमयपर्वतो वह्निमानित्यादौ व्यर्थविशेषणासिद्धिः। अप्रमेयपर्वतो वन्हिमानित्यादावप्रसिद्धविशेषणासिद्धिः। गगनारविन्दं सुरभीत्यादावयोग्य-विशेषणासिद्धिः।

भविष्यद्घटो गन्धवानित्यदौ पूर्वत्वासिद्धिः[173] । प्रत्यक्षादिना साध्यसिद्धौ पक्षत्वासिद्धिः । इयमेव सिद्धसाधनता । अयं दोषः संशयपक्षताङ्गीकारे । सिसाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वे नैष दोषः । सामानाधिकरण्येनानुमितिं प्रति अवच्छेदकावच्छेदेन सामानाधिकरण्येन च सिद्धिः प्रतिबन्धिका । अवच्छेदकावच्छेदेनानुमितिं प्रत्यवच्छेदकावच्छेदेनैव सिद्धिः प्रतिबन्धिका, न तु सामानाधिकरण्येन । कथायां विमतस्यैव पक्षत्वात् संशयः पक्षता[174] । एवं बाधनिश्चयोऽपि प्रतिबन्धकः ।

साध्यासिद्धिरप्येवं सप्तविधा । वह्निगुञ्जापुञ्जयोर्विवेकाभावे विवेकासिद्धिः । वह्निज्ञानस्यैवाभावे अज्ञानासिद्धिः । प्रकाशमयवन्हिमानित्यादौ व्यर्थविशेषणासिद्धिः । अवाच्यवन्हिमानित्यादाव-प्रसिद्धविशेषणासिद्धिः । ह्रदीयवन्हिमानित्यदावयोग्यविशेषणासिद्धिः ।[175]प्रत्यक्षादिना वन्हिनिश्चये सन्दिग्धत्वाभावात् साध्यत्वासिद्धिः । पक्षविशेष्यकसन्देहप्रकारत्वं साध्यत्वमिति पक्षेऽयं दोषः । अनुमितिविधेयत्वपक्षे न दोषः ।

आश्रयासिद्धिसाध्यासिध्योरनुमितिप्रतिबन्धकत्वम् । हेत्वसिद्धिस्तु द्वादशविधा । तत्र सप्तप्रकाराः पूर्ववत् । अन्ये प्रकारास्तु अप्रयोजकत्वासिद्धिः भागासिद्धिः स्वरूपासिद्धिः व्यधिकरणा-सिद्धिर्व्याप्यत्वासिद्धिश्चेति पञ्च । शब्दो नित्यः आकाशविशेषगुणत्वादित्यत्र हेतोः साध्या-साधकत्वेनाप्रयोजकत्वम् । इदमेव प्रकरणसमत्वमिति वेदान्तिनः[176] । यथा विश्वं मिथ्या दृश्यत्वादित्यत्र दृश्यत्वस्य सत्यत्वमिथ्यात्वोभयसाधकत्वेन प्रकरणसाम्यम् । हेतोः पक्षैकदेशावृत्तित्वे भागासिद्धिः- घटः पृथिवी नीलत्वादिति । पक्षमात्रावृत्तित्वे स्वरूपासिद्धिः - घटो द्रव्यं जलत्वादिति । हेतुसाध्ययोरसामानाधिकरण्ये व्यधिकरणासिद्धिः - ऊर्ध्वदेशो वृष्टिमान् अधोदेशे नदीपूरात् ।

सोपाधिकत्वं व्याप्यत्वासिद्धिः । साध्यस्य कृतौ ज्ञप्तौ वा प्रयोजकः उपाधिः । स च साध्य-व्यापकत्वे सति साधनाव्यापकः । धूमवान्वन्हेरित्यत्रार्द्रेन्धन-वह्निसंयोगो धूमोत्पत्तौ प्रयोजकः । घटः पृथिवी द्रव्यत्वादित्यत्र रूपवत्त्वं व्याप्तिदर्शनेन साध्यज्ञप्तिप्रयोजकम् । [177]अत एव पक्षेतरत्वं नोपाधिः । [178] अन्ये तु बाधानुन्नीतपक्षेतरत्वं स्वव्याघातकत्वान्नोपाधिः । पक्षस्य सन्दिग्धसाध्यवत्त्वात् बाधोन्नीतपक्षेतरत्वं तूपाधिः । प्रत्यक्षेण पक्षे साध्याभावग्रहेण साध्यव्यापकत्वनिश्चयादित्याहुः ।

---

173. किमस्य मूलम् इति चिन्त्यम् ।
174. संशयपक्षतैव इति मातृका ।
175. पूर्वत्वासिद्धिः कुत्र ?
176. वस्तुतस्तु न वेदान्तिनिमित्ता संज्ञा । न्यायभूषणादौ तथैव वर्णितत्वात् ।
177. प्रयोजकत्वाभावेन इत्यर्थः ।
178. तथा चिन्तामणौ ।

निश्चितसाध्यसाधनवत्युपाधिसन्देहे[179] सन्दिग्धोपाधिः। तेन व्यभिचारसंशयः। स च व्याप्तिनिश्चयप्रतिबन्धकः।

अयमुपाधिः क्वचिद्व्यभिचारोन्नायकः; क्वचित् प्रतिपक्षोन्नायकश्च। उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। उपाध्यभावेन साध्याभावानुमानं च। साध्यव्यापकत्वं च पञ्चविधम् - शुद्धसाध्यव्यापकत्वं, पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं, साधनावच्छिन्नसाध्यव्यापकत्वम्, उदासीन-धर्मावच्छिन्नसाध्यव्यापकत्वं, पक्षावृत्तित्वे[180] सति साध्यव्यापकत्वं चेति।

धूमवान्वन्हेरित्यत्रार्द्रेन्धनसंयोगः[181]। अयं पक्षे साध्यसंशये व्यभिचारोन्नायकः। तत्पूर्वं सत्प्रतिपक्षोन्नायकः[182]।

वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपं द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्य-व्यापकः। अयं व्यभिचारोन्नायक एव। प्रतिपक्षानुमाने रूपे व्यभिचारात्। यत्र यद्धर्मावच्छिन्नसाध्य-व्यापकः उपाधिस्तत्र तद्धर्मवत्युपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्।

ध्वंसो नाशवान् जन्यत्वादित्यत्र जन्यत्वरूपसाधनावच्छिन्ननाशव्यापकत्वाद्भावत्वमु-पाधिर्व्यभिचारोन्नायक एव। प्रतिपक्षे तु प्रागभावे व्यभिचारः।

गगनं क्रियावद्भूतत्वादित्यत्र विशेषगुणवत्त्वरूपोदासीनधर्मावच्छिन्ने[183] साध्यव्यापकत्वात् स्पर्शवत्त्वमुपाधिः। अयं व्यभिचारोन्नायक एव। प्रतिपक्षे मनसि व्यभिचारात्।

वायुर्गन्धवान् स्पर्शादित्यत्र पक्षावृत्ति रूपम्। प्रतिपक्षोन्नायकम्।

कालत्रयेऽपि अभावेन प्रमाणसिद्धं साध्यं यस्येति व्युत्पत्त्या त्रैकालिकपक्षवृत्त्यभाव-प्रतियोगितया प्रमाणान्तरसिद्धसाध्यको हेतुः कालात्ययापदिष्टः। तत्त्वं बाध इत्युच्यते। स च पक्षे साध्याभावरूपः। साक्षादनुमितिप्रतिबन्धकः। अवच्छेदकावच्छेन साध्यसिद्धेरुद्देश्यत्वे अवच्छेदकावच्छेदेन बाधः, अंशे बाधश्च प्रतिबन्धकः। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति त्ववच्छेदकावच्छेदेन बाधः प्रतिबन्धकः। न तु सामानाधिकरण्येन।

साध्यवैकल्यादयो दृष्टान्तदोषाः सर्वे दोषा हेतौ ज्ञानविषयतया।

उक्तस्यार्थान्तरं प्रकल्प्य दूषणं छलम्। असमर्थमुत्तरं जातिः। साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्य-विकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनु-

---

179. साधनेत्यधिकम्।

180. किमर्थमिदम् इति उत्तरत्र।

181. शुद्धसाध्यव्यापकः इति स्यात्।

182. सत्प्रतिपक्षताफलं तु साध्यसन्देह एव। सचेत्पूर्वमुत्पन्नः न तदा सत्प्रतिपक्षताकार्यम् इति व्यभिचारोन्नायकता।

183. मनसि साध्याव्यापकत्वभङ्गार्थमिदम्।

पलब्धिनित्यानित्यकार्यसमेति चतुर्विंशतिधा । समेति प्रत्येकमन्वयः । सर्वजातिसाधारणमसामर्थ्यं स्वन्यायविरोधः । युक्ताङ्गराहित्यम् अयुक्ताङ्गाधिक्यम् अनुचितविषयवृत्तित्त्वं चेति त्रिविधमसामर्थ्यम-साधारणम् । एतत्सर्वं मत्कृते लोकोपकारे मुद्रिते द्रष्टव्यम् ।

निग्रहस्थानानि तु प्रतिज्ञाहानिः, प्रतिज्ञान्तरं, प्रतिज्ञाविरोधः, प्रतिज्ञासन्यासो, हेत्वन्तरम्, अर्थान्तरं, निरर्थकम्, अविज्ञातार्थकम्, अपार्थकम्, अप्राप्तकालं, न्यूनम्, अधिकं, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपो, मतानुज्ञा, पर्यनुयोज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तो, हेत्वाभासाश्चेति द्वाविंशतिः । अतन्निग्रहप्राप्तौ तन्निग्रहोद्भावनस्य निरनुयोज्यानुयोग-रूपत्वात् तत्रैव छलजात्योरन्तर्भावेऽपि सौकर्याय पृथगुक्तिः । अन्यत्सर्वं मत्कृते लोकोपकारग्रन्थे विस्तराद्द्रष्टव्यम् ।

तस्मात्पदार्थतत्त्वज्ञानादुपास्यानुपास्यज्ञानम् । तेनोपासनीयमुपास्यापवर्गं प्राप्नोति । ग्रन्थबाहुल्ये विक्षेपभिया पूर्यते ।

भूषणं खलवत्कस्य सततं परदूषणम् ।[184]
यथा कामीकसः पुष्पदिग्धस्निग्धतनूरहम् ॥ 1 ॥
यस्योपास्योपदेष्टारौ सूत्रकृत्समवर्तिनौ ।
जप्यौ च प्रणवाष्टार्णौ तेनेदं कृतमर्थिसात्[185] ॥ 2 ॥

इति श्रीकृष्णावधूतपण्डितकृते तर्कनवनीते दोषनिरूपणं नाम तृतीयगोलकम् ॥

॥ समाप्तश्चायं ग्रन्थः ॥



---

184. भूषणं खलवत् कस्य सततं परदूषणम् । यथाकामौकसः पुष्पदिग्धस्निग्धतनूरुहम् इति स्यात् ।

185. यस्य मध्वमुनेः उपास्यः उपदेष्टा च सूत्रकारः व्यास एवेति तथोक्तिः । तादृशेन मध्वमुनिना इदं रचितमिति स्वाहङ्कारखण्डनं समर्पणं च । मया न कृतम्, अन्तर्नियामकेन प्राणेनैव कृतम् इति भावः । अथवा यस्य कृष्णावधूतपण्डितस्य उपास्यः भगवान् श्रीकृष्णः, उपदेष्टा गुरुश्च शुक्राचार्यः तावुभावपि सूत्रकृतः व्यासस्य समवर्तिनौ, प्रणवाष्टार्णौ प्रणवनारायणाष्टाक्षरमन्त्रौ च यस्य जप्यौ भवतः; तेन कृष्णावधूतेन इदं तर्कनवनीतम् अर्थिसात् कृतमित्यर्थः ।

वरखेडीत्युपाह्वेन श्रीनिवासेन विस्तरात् ।
टिप्पणं रचितं तेन तुष्यतां विदुषां गणः ॥